य एव यत्नः क्रियते परराष्ट्रावमर्दने ।
स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने ॥ २८
धर्मेण राज्यं विन्देत धर्मेण परिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥ २९
अप्युन्मत्तात्प्रलपतो बालाच्च परिसर्पतः ।
सर्वतः सारमादद्यादश्मभ्य इव काञ्चनम् ॥ ३०
सुव्याहृतानि सुधियां सुकृतानि ततस्ततः ।
संचिन्वन्धीर आसीत शिलाहारी शिलं यथा ॥ ३१
गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ३२
भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा ।
अथ या सुदुहा राजन्नैव तां वितुदन्त्यपि ॥ ३३
यदतप्तं प्रणमति न तत्संतापयन्त्यपि ।
यच्च स्वयं नतं दारु न तत्संनामयन्त्यपि ॥ ३४
एतयोपमया धीरः संनमेत बलीयसे ।
इन्द्राय स प्रणमते नमते यो बलीयसे ॥ ३५
पर्जन्यनाथाः पशवो राजानो मित्रबान्धवाः ।
पतयो बान्धवाः स्त्रीणां ब्राह्मणा वेदबान्धवाः ॥ ३६
सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥ ३७
मानेन रक्ष्यते धान्यमश्वान्रक्ष्यत्यनुक्रमः ।
अभीक्ष्णदर्शनाद्गावः स्त्रियो रक्ष्याः कुचेलतः ॥ ३८ C. 5. 1153 B. 5. 34. 40 K. 5. 34. 41

---

text). — [d]) K_3 अप्राबाहितचर्मवत्.

28 [a]) G_3 M transp. यत्नः and क्रियते. B_3 $D_{5.8}$ कर्तव्यः (for क्रियते). — B_3 om. 28[ab]. — [b]) B (B_3 om.) D (except $D_{1.2.7.9}$) T G परराष्ट्रविमर्दने. — [d]) M स्वराष्ट्रपरिरक्षणे.

29 [a]) K_1 $D_{1.2.7.9}$ S (except T_2 G_3; G_4 damaged) राष्ट्रं (for राज्यं). K_3 (by corr.; orig. as in text) विंदेत; D_3 विविदेत; T_2 वीक्षेत. — After 29, G_3 repeats 25 with v. l. [प्राप्यापि (for प्राप्तवान्); and अनवस्थितः (for अनये स्थितः:)].

30 [b]) K_3 B (except B_1) Dn $D_{8.9.10}$ T_2 °जल्पतः; $C_{a.d.s}$ °सर्पतः (as in text). T_1 G (except G_3) बालादपि सुभाषितं. — [d]) S (except G_3; T_2 by corr.; orig. as in text) पांसुभ्यः (for अश्मभ्यः).

31 [a]) D_3 D_1 अप्याहृ(D_1 °हि)तानि. B Dn D_3 $D_{8.9.10}$ T_2 सूक्तानि (B_1 सुमतं); T_1 G (except G_3) M महतां (for सुधियां). — [b]) M सुमतानि (for सुकृ°). — [c]) K_4 विचिन्वन्; $C_{d.s}$ as in text. D_{51} D_1 वीर (for धीर). — [d]) $K_{1.3}$ D_8 शालाहारी; K_2 $G_{2.4.5}$ M सला°; D_3 शिलाहारः; $C_{a.d.s}$ as in text. $K_{1.2.3}$ D_3 शालं; $G_{2.4.5}$ M सलं; $C_{a.d.s}$ as in text.

32 =(var.) Pañcatantra 3. 64; =(var.) Śārṅgadharapaddhati 1448; =(var.) Vikramacarita (ed. F. Edgerton) SR 8. 1 and JR 8. 2. — [a]) $K_{3.8}$ गावः पश्यंति गंधेन. — [b]) K_4 शास्त्रैः (for वेदैः). K_3 D_8 D_{10} बाडवाः; K_4 D_2 पंडिताः; $D_{3.4}$ च द्विजाः (for ब्राह्मणाः). — [d]) G_3 सर्वजंतवः (for इतरे जनाः).

33 =C. 12. 2503. — [b]) T_1 G_1 दुर्दुघा; $C_{a.d}$ दुर्दुहा (as in text). — [c]) Dn D_8 अथ वा (for अथ या). T_1 $G_{1.2.3}$ सुदुघा. D_1 गावं; $D_{3.7}$ S (except T_2 G_1) भवति (for राजन्). — [d]) T_1 G (except G_3) transp. नैव and तां. K (K_3 missing) $D_{5.9}$ विनि(D_9 °प्र)तुंजते; Dn D_3 $D_{8-8.10}$ वितुदंत्यपि. D_1 नैव तद्धि नियुज्यते.

34 =(var.) C. 12. 2504. — [a]) T G (except G_3) प्रणमते; C_d as in text. — [b]) T_1 $G_{1.2-3}$ M तत्र (for त्वपि). $K_{1.2.4}$ $D_{1-4.7-9}$ T_2 G_3 न तत्संतापमर्हति. — [c]) G_3 न तद्; G_3 नते; M नमेद्; $C_{a.d}$ नतं (as in text). D_4 यत्स्वयं संनमेद्दारु; T_1 $G_{1.4}$ यत्स्वयं नमते दारु. — [d]) $K_{1.4.5}$ Dn $D_{3.4.7.8}$ T_2 न तत्संता(K_4 °द्दा)पयं-त्यपि; S (except G_3; G_4 damaged) M न तत्संनामयेद्बुधः.

35 [a]) K (K_3 missing) D_3 G_3 (before corr.)$_{.4.5}$ वीरः; D_3 धीमान्; G_3 राजन् (for धीरः). — [b]) K (K_3 missing) D_3 प्रणमेत; D_3 यो नमेत (for संन°). — [c]) K_3 B_3 प्रणमति. — [d]) D_3 यो नमेत (for नमते यो).

36 [b]) K_3 अमात्य°; K_3 D (except $D_{1.2.9}$) T_2 G_1 (after corr.) C_{ap} संधि°; T_1 G_1 (before corr.) सुत°; $C_{a.d.s}$ मित्र° (as in text). — [c]) T_2 $G_{2.4}$ M transp. पतयः and बांधवाः. G_3 तथा वै (for पतयो). T_1 G_1 देवताः; G_3 पतयः; $C_{a.d}$ बान्धवाः (as in text).

37 [b]) K_4 S (except T_2 $G_{1.3}$) अभ्यासेन; $C_{a.d.s}$ योगेन (as in text). — [c]) K_4 (sup. lin.) लज्जया; D_{52} मृगया; $C_{a.d.s}$ मृजया (as in text). — [d]) D_1 शीलेन; T_1 वृत्तेन (for वृत्तेन).

38 [b]) S (except T_2 G_3) रक्षेत् (for रक्षति). S अनुक्रमात्; $C_{a.d}$ अनुक्रमः (as in text). C_s cites अनुक्रमणं. — [c]) K_4 B D (except D_9) T_2 $G_{1.3}$ C_s अभी-

C. 5. 1194
B. 5. 34. 41
K. 5. 34. 42

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्त्येष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ३९
य ईर्ष्युः परवित्तेषु रूपे वीर्ये कुलान्वये ।
सुखे सौभाग्यसत्कारे तस्य व्याधिरनन्तकः ॥ ४०
अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।
अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ४१
विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
एते मदावलिप्तानामेत एव सतां दमाः ॥ ४२
असन्तोऽभ्यर्थिताः सद्भिः किंचित्कार्यं कदाचन ।
मन्यन्ते सन्तमात्मानमसन्तमपि विश्रुतम् ॥ ४३
गतिरात्मवतां सन्तः सन्त एव सतां गतिः ।
असतां च गतिः सन्तो न त्वसन्तः सतां गतिः ॥ ४४
जिता सभा वस्त्रवता समाशा गोमता जिता ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ४५
शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥ ४६
आढ्यानां मांसपरमं मध्यानां गोरसोत्तरम् ।
लवणोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥ ४७
संपन्नतरमेवान्नं दरिद्रा भुञ्जते सदा ।
क्षुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥ ४८
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
दरिद्राणां तु राजेन्द्र अपि काष्ठं हि जीर्यते ॥ ४९

क्षणदर्शनं गात्र (D7 T2 G1 °त्र:). — d) K1.2.4 D8 G3 रक्षेत् (for रक्ष्या:). K (K3 missing) B1.3 Dn2 Ds2 D8 Cap कुचेलता; Dn1 कुचेन च; D2 G3 कुशीलता. D1.3 स्त्रियो रक्ष्यत्वचेलता. Ca.d.8 cite अचेलता.

39 a) B3 वृत्तिहीनस्य; D3 हीनवृत्तानां (for वृत्त°). — b) K2.4.5 B2.4 Dn2 Ds2 D5.7 अंतेषु; D1 S (except T2 G2) अन्येषु (for अन्त्येषु). S (except T2 G2-4) च (for हि). D10 अंतावसायिजातानां.

40 a) K3 ईर्ष्यालु:; G3.5 यस्यैषा; G4 यं रक्षय: (for य ईर्ष्युः). K5 B D (except Dn2 D3 D5.8) T2 G2 ईर्षुः; Cd.8 ईर्ष्युः (as in text). — b) K1.4.5 G4 transp. रूपे and वीर्ये. K1.4 D1 T1 G (G4 damaged) M1 (sup. lin.) कुलेन्वये (for कुला°). — c) G4 शीले (for सुखे). D1 °संस्कारे (for °सत्कारे). K (K3 missing) Dn2 D5 D2.6.8.10 T G3 M1.2 सुखसौभाग्यसत्कारे (K1 °संस्कारे). — d) G3 M तस्य चाधिर्निरंतर:.

41 b) D3 तु (for च). T1 G1.4.5 विसर्जे° (for विवर्जे°). — d) Cd येन माद्येत तत्पिबेत्!

42 a) K1 (by corr.).4.5 B (except B3) D (for D3 see below) T2 G2 transp. एते and मदा:. K1 (orig.).2 D3 एते मदा मदांधानां. — d) K1 त एव हि (for एत एव).

43 a) K3 प्रार्थिता:; B3-5 Dn D8 D2-8.10 T2 -अभ्य- (D10 -भ्य)र्चिता:; D1 G3 ह्यर्थिता:. Cn cites अर्थिता:. — b) B D (except Dn2 D1.3.7.9) T2 कश्चित्कार्यं (for किंचित्कार्यं). — After 43ab, B1 D6.8 T2 ins.:

189* तावच्च तस्य सुकृतं किंचित्कार्यं कदाचन ।

— d) B1 D3 G3 इति; T2 G1.4.5 चापि; Ca.d अपि (as in text).

44 a) S (except T2) एवात्मन:; Ca.8 आत्मवतां (as in text). D3 असंत: संतमात्मानं. — b) D3 * * संभावयत्सुत. — cd) D3 आत्मनो हि गति: संत: संत एव सतां गति:!

45 a) T1 G1.3.5 transp. जिता and सभा. D1 वसु°; G4 शास्त्र° (for वस्त्र°). — b) K (K3 missing) B3.4 Dn D3-8.10 T2 G2 मि(K2.4.5 D7 G1 मृ)ष्टाशा; B1.2.5 °धनाशा; D3 G3 सुखाशा; D1 सधना (for समाशा). — d) G4 अर्थ° (for शील°)!

46 b) D2.5.9 तद्यदास्य; M तच्च यस्य (for °स्येह). K1 (after corr.) न विद्यते, (before corr.) न विंदति (for प्रणश्यति). G4 तच्चास्य विप्रण°. — d) Ds2 D8.10 च (for the second न).

47 b) B1 D6.8.9 गोरसोत्तमं; B3 गोरसं परं; Ca as in text. — c) Hypermetric! K1.3.4 तैलप्रायं; K5 B3-5 Dn T2 (m as in text) G3 तैलोत्तरं (Dn1 °मं); B1.2 तिलोत्तमं (B2 °रं) (for लवणोत्तरं).

48 b) B1 D2.4.9 जना: (for सदा). — d) D3 सदा (for सा च). — K4 repeats 48 with v. l. [संपन्नतरं (for °तरं), and मत (for क्षुत्).]

49 a) D3 गेहे; Ca लोके (as in text). — c) K5 D3 च (for तु). K2 काष्ठान्यपि हि जीर्यंते; B Dn D8 D2-8.10 T2 G1 जीर्यंत्यपि हि (B1 Ds1 D2-8 T2 तु) काष्ठानि; G3 दरिद्राणां महाराज. — d) D1 ह्यपि (for अपि). K4 T1 G1.2.8 काष्ठादि (K4 °नि); D1 काष्ठोपि; M काष्ठं च (for काष्ठं हि). M जीर्यंति (for जीर्यंते). K5 B3-5 दरिद्राणां तथोदरे (K2 °णां तु भारत); K5 G2.4 काष्ठमश्म च

अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद्भयम् ।
उत्तमानां तु मर्त्यानामवमानात्परं भयम् ॥ ५०
ऐश्वर्यमदपापिष्ठा मदाः पानमदादयः ।
ऐश्वर्यमदमत्तो हि नापतित्वा विबुध्यते ॥ ५१
इन्द्रियैरिन्द्रियार्थेषु वर्तमानैरनिग्रहैः ।
तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ॥ ५२
यो जितः पञ्चवर्गेण सहजेनात्मकर्शिना ।
आपदस्तस्य वर्धन्ते शुक्लपक्ष इवोडुराड् ॥ ५३
अविजित्य य आत्मानममात्यान्विजिगीषते ।
अमित्रान्वाजितामात्यः सोऽवशः परिहीयते ॥ ५४
आत्मानमेव प्रथमं देशरूपेण यो जयेत् ।
ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ ५५
वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥ ५६

रथः शरीरं पुरुषस्य राज-
न्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशलः सदश्वै-
र्दान्तैः सुखं याति रथीव धीरः ॥ ५७

एतान्यनिगृहीतानि व्यापादयितुमप्यलम् ।
अविधेया इवादान्ता हयाः पथि कुसारथिम् ॥ ५८
अनर्थमर्थतः पश्यन्नर्थं चैवाप्यनर्थतः ।
इन्द्रियैः प्रसृतो बालः सुदुःखं मन्यते सुखम् ॥ ५९ C. 5. 1135 B. 5. 34. 61 K. 5. 34. 62

(G3 °ष्ठमदमापि; G4 °ष्ठं चाक्ष्मापि) जीर्यते. B1.6 Dn Ds D2–8.10 T2 दरिद्राणां महीपते. Cd cites 49d as in text! — After 49, K3 D7 ins.:

190* यथा यथा महत्तन्त्रं विस्तरश्च यथा यथा ।
तथा तथा महद्दुःखं सुखं तु न तथा तथा ।

50 a) B1.2.6 Ca अवृत्तेः; T1 G1–4 M अशनात्; Cd.s अवृत्तिः (as in text). K2.4.6 D1–4.7.10 T2 अ(D1 म)वृत्तिभयम्. G5 अशनाद्भयं तु मंदानां (hypermetric). — c) D1 तु सत्वानां; D3 मनुष्याणां; G5 तु सर्वेषां (for तु मर्त्यानां). — d) K1 D8 अप(D9 °व)मानान्महद्भयं; M (M1 inf. lin. as in text) अवमानभयं भयं.

51 a) D1.8 ऐश्वर्यप(D8 °स)दमाविष्टाः; S ऐश्वर्यमत्ताः (G3 °मदाः) पापिष्ठाः; Cn.s °मदः पापिष्ठो; Cd as in text. — b) K1.2.4 D9 मदा मद्य(D8 -व्यान)मदादयः; D2 मद्यपान°; S मधु(T2 °द्य)पानमदादपि. — c) T2 तु (for हि). M ऐश्वर्यमदमत्तानां. — d) K1.2.4 D1.8 विमाद्यति (D2 °ते); D9 विरुध्यते (for विबुध्यते). D8 नोपतित्वाव-बुध्यते; T1 G नाप(G4 न हि)तिष्ठति (G3 °हैत) कुत्रचित्; M गतिरूर्ध्वा न विद्यते. — After 51, G8 repeats 51cd, with v. l., as in M.

52 b) K2(m as in text) असंयुतैः; Ca.d अनिग्रहैः (as in text). — c) D1 नीय°; D2 श्राम्य°; G1.2.4 M तप्य° (for ताप्य°). D1 G4 लोके (for लोको).

53 b) B Dn Ds D1–4.7.8 T2 Cn आत्मकर्षिणा; D5.6 अनु°; D9 अप°; D10 °वर्तिना.

54 =(var.) 5. 127. 27 (cf. v. l. 55). — a) B2.4 Dn2 D2.4.10 यथात्मानं; G5 यमा° (for य आ°). — c) K D2.7 G2 अजितात्मा; B1 अमित्रात्मा; D1 अमात्यान्मि- (for अमित्रान्वा). D8 अमित्राश्चार्थतोमात्य:.

55 =5. 127. 28 (cf. v. l. 54). — b) K1 (before corr. as in text) उपदेशेन; B2–6 T2 (before corr.) Cn द्वेष्यरूपेण; B1 Dn D2–6.8 द्वेष°; D5 देशे कालेन; G2.5 शम°; Ca.d.s देश° (as in text). ※ Ca: दृष्टरूपेणेत्यसम्यक् । ※ — c) M मित्राणि (for अमात्यान्). M1.2.4 अमात्यान् (for अमित्रान्). — d) K1.4 क्रमेण; K2 ततोऽन्यं (for न मोघं). D9 न स मोघं जिगीषति; S (except T2 G3) नियतः कुरुते वशे; Cs as in text.

56 =5. 127. 29. — a) K2 B D (except D1–4.7) T2 G2 जितात्मानं (for °मात्यं). — b) K1 m (orig. as in text) D5 D10 Cs विकारिणं (D5 Cd.s °णां); Ca विकारिषु (as in text). — c) D2.5.8 वीरं; D2 शूरं; S (except T G1.2) दान्तं (for धीरं). D5 D10 अत्यर्थं (for अत्यन्तं).

57 =(var.) C. 3. 13942. — a) K (K3 missing) D1.7.8 G3 सर्वं; D5 स्थूलं; T1 G5 M दृष्टः; G5 दृष्टं (for राजन्). — b) T1 G2 यंता च; G5 यंता (for नियन्ता). D10 एव (for अस्य). D8 अस्य वाहा:; T1 G1.3.5 आहुरश्वान् (for अस्य चाश्वाः). — c) K1.2.4 D2(orig.).8 कुशलैः; K4 B Dn2 D5 D1–7.8(by corr.).10 T2 G2 कुशली (for कुशलः). D8 G5 सदाश्वैः. — d) G5 कृती (for सुखं). K3 (orig. as in text) D1 M यथैव; T1 G1.5 स एव; G2 सदैव (for रथीव). D8 G5 वीरः (for धीरः).

58 =(var.) 5. 127. 26. — a) D8 अपि गृहीतानि; M (inf. lin. as in text) अनुगृही°. — c) D1 अयनाद्यै (for अविधेया). — d) B2 D8 D1.2.10 हयाः पथिषु सारथिं; S (except T1 G2; G4 damaged) सरथं सारथिं हयाः.

C. 5. 1155 B. 5. 34. 62 K. 5. 34. 63 धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ६०
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वर्याद्भ्रश्यते हि सः ॥ ६१
आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ६२
क्षुद्राक्षेणेव जालेन झषावपिहितावुभौ ।
कामश्च राजन्क्रोधश्च तौ प्रज्ञानं विलुम्पतः ॥ ६३
समवेक्ष्येह धर्मार्थौ संभारान्योऽधिगच्छति ।
स वै संभृतसंभारः सततं सुखमेधते ॥ ६४
यः पञ्चाभ्यन्तराञ्शत्रूनविजित्य मतिक्षयान् ।
जिगीषति रिपूनन्यान्रिपवोऽभिभवन्ति तम् ॥ ६५
दृश्यन्ते हि दुरात्मानो वध्यमानाः स्वकर्मभिः ।
इन्द्रियाणामनीशत्वाद्राजानो राज्यविभ्रमैः ॥ ६६

असंत्यागात्पापकृतामपापां-
स्तुल्यो दण्डः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावा-
त्तस्मात्पापैः सह संधिं न कुर्यात् ॥ ६७

निजानुत्पततः शत्रून्पञ्च पञ्चप्रयोजनान् ।
यो मोहान्न निगृह्णाति तमापद्ग्रसते नरम् ॥ ६८
अनसूयार्जवं शौचं संतोषः प्रियवादिता ।
दमः सत्यमनायासो न भवन्ति दुरात्मनाम् ॥ ६९

---

59 a) ❀ Ca: आद्यन्तमिति च पाठः । ❀ D_5 अर्थवत्; Ca. d. s अर्थेशः (as in text). — b) $B_{3.5.6}$ D_{n1} D_7 अनर्थवत्; Ca. d. s as in text. — c) M_{3-5} इंद्रिय-. $K_{3.4}$ D_7 G_2 प्रसृतैः; K_4 B D_n D_5 $D_{8.9.10}$ T_2 अजितैः; T_1 $G_{1.3-5}$ प्राकृतः; Cd. s प्रसृतः (as in text). — d) T_2 G_1 स (for सु-).

60 c) D_7 श्रीधनप्राणदारेभ्यः; T_1 G (except G_2) $M_{1.2}$ श्रीप्राणराष्ट्र°; $M_{3.4}$ °धान्येभ्यः. — d) K (K_2 missing) सोचिरः (for क्षिप्रं स); cf. 54d. G_2 परिभूयते (for °हीयते).

61 d) D_5 G_3 (by corr.) भ्रश्यतीह (for भ्रश्यते हि). $B_{1.2}$ भ्रश्यतीह न संशयः.

62 a) K_3 आत्मनो मानमन्वि°; D_7 G_2 आत्मानं ह्या(G_2 आ)त्मनान्वि°. — b) D_5 यतः; D_1 रतः; T_1 G (except G_2) शुचैः; M हितैः (for यतैः). K (K_2 missing) आत्मानमवसादयेत्. Ca cites 62a, and Cd cites 62ab as in text. — 62cd =(var.) 1. 67. 7ab; Gītā (Vulg.) 6. 5cd. — c) K_3 आत्मनो बंधुरात्मैव; $K_{4.5}$ B D (except D_{n2} $D_{1-4.8}$) T_2 आत्मा ह्येवात्मनो बंधुः. — d) M_{3-5} गतिः (for रिपुः). $K_{3.4.5}$ G_2 रिपुरात्मैव चात्मनः. — After 62, $K_{4.5}$ (om. line 2) B ($B_{1.3.4}$ om. line 2) D (D_2 marg.; D_9 om. line 1) T_2 ins.:

191* बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः ।
स एव नियतो बन्धुः स एव नियतो रिपुः ॥

[(L. 1) =(var.) Gītā (Vulg.) 6. 6ab. D_{n2} D_2 transp. एव and आत्मा. — (L. 2) K_4 नियमो; D_5 D_8 (by corr.).6.9 अनियतो (for the second नियतो).]

63 =(var.) 5. 127. 30. — a) K_2 (m as in text) छिद्रात्मनेण; Ca. d. s as in text. D_{n1} च; D_5 $G_{3.5}$ एव; Ca. n. s इव (as in text). — b) $K_{1.4}$ D_n D_5 $D_{2.3.4}$ (by corr. as in text).7.8.10 G_3 Ca. d. s उभू; Cap उभौ (as in text). — d) T_1 $G_{1.3}$ द्वौ (for तौ). D_5 प्रदानं; D_1 G_2 विज्ञानं; Ca. d as in text. K_3 तौ ज्ञानमवलुंपतः.

64 a) D_2 प्रसमीक्ष्य; Ca. d. s समवेक्ष्य (as in text). $K_{1.2.3}$ D_7 T_1 G_1 हि (for इह). — b) $D_{3.4}$ सभां राज्ञोधि°.

65 a) G_2 पंचाभ्यंतरजाञ्छत्रून्. — b) G_4 विनिर्जित्य (for अविजित्य). B D_n $D_{8-8.10}$ T_2 Ca. p. s मनोमयान्; G_2 M मनीषयान्; Ca. d as in text. — c) G_2 जिगीषते. K_3 विजिगीषति वै बाह्यान्. — d) G_2 M आपदो; G_4 नृपाश्च (for रिपवो). G_4 $M_{3.4}$ (inf. lin. as in text) अपि (for अभि-). K_3 सोचिरस्तैर्विजीयते.

66 K_3 om. 66–71. — a) $D_{5.6}$ च (for हि). $B_{3.4}$ D_n $D_{2.5.7.8}$ महा° (for दुरा°). — b) K_1 वध्य-कामाः; B $D_{1.2.3.5.9}$ G_2 बध्यमानाः; T_1 $G_{1.3}$ वर्ध्यंते हि; M मुह्यमानाः. — c) K_1 अनैश्वर्यात् (for अनीशत्वात्). — d) $K_{1.4.5}$ $D_{1.3.7}$ G_2 चित्तविभ्रमैः; B (except B_4) D_5 $D_{8-6.10}$ T_2 राज्यविभ्रमे; T_1 $G_{1.3-5}$ M °विप्लुताः.

67 =(var.) C. 12. 2797. — K_3 om. 67 (cf. v. l. 66). — b) D_1 स्पृशति. D_{n2} D_{10} T_1 G_3 $M_{3.5}$ मिश्रभावात्; D_8 अपि भारत (for मिश्र°). — c) D_{n2} G_2 M_2 मिश्र°; D_8 (m as in text) मिथ्या° (for मिश्र°). — d) D_7 T_1 G_1 संगं (for संधिं).

68 K_3 om. 68 (cf. v. l. 66). — a) K_4 अविजित्य ततः शत्रून्. — b) D_5 $G_{3.4}$ (by corr. as in text) M_2 °प्रयोजनात्; Ca. d. s as in text.

69 K_3 om. 69 (cf. v. l. 66). — b) D_1 नाभिमानिता (for प्रिय°). — d) T_1 $G_{1.3}$ नैव मार्गो (for न भवन्ति).

आत्मज्ञानमनायासस्तितिक्षा धर्मनित्यता ।
वाक्चैव गुप्ता दानं च नैतान्यन्त्येषु भारत ॥ ७०
आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् ।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ ७१
हिंसा बलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥ ७२
वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥ ७३
अभ्यावहति कल्याणं विविधा वाक्सुभाषिता ।
सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ ७४
संरोहति शरैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ ७५
कर्णिनालीकनाराचा निर्हरन्ति शरीरतः ।
वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥ ७६
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ ७७
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सोऽपाचीनानि पश्यति ॥ ७८
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसंकाशो हृदयान्नापसर्पति ॥ ७९ C. 5. 1175 B. 5. 34. 82 K. 5. 34. 83

70 K_3 om. 70 (cf. v. l. 66). — ^{a}) M_1 (*inf. lin.* as in text).$_{2-5}$ असंरंभः (for अनायासः). K_1 आत्मज्ञानसमारंभः. — ^{c}) D_n सूक्ता; $C_{n.d.s}$ गुप्ता (as in text). D_1 G_3 गुप्तदानं च; $D_{3.4.5}$ मधुरा दानं; C_s as in text. D_2 वाक्शौचमधुरादानं. — ^{d}) K_3 एते हि; D_1 G_4 एतान्; G_5 एषाम् (for एतानि). $K_{1.4}$ $B_{1.2.4.5}$ D_{n1} D_{s2} D_{7-10} M_3 अंतेषु; K_5 अशेषु; B_3 G_4 अन्येषु; D_1 T_1 $G_{1.3}$ एतेषु; G_5 एतानि; $C_{a.d.n}$ अन्त्येषु (as in text). $D_{3.4.9}$ कुत्स्नशः (for भारत).

71 K_3 om. 71 (cf. v. l. 66). — ^{b}) D_1 बुधं (for बुधान्). $K_{1.4.5}$ $D_{3-6.9-10}$ विहिं(K_1 D_8 $^{\circ}$ह)सन्त्यबुधो बुधान्; M हिंसयन्त्यबुधा बुधं.

72 ^{b}) K_1 राज्ञो; C_s राज्ञां (as in text). — ^{c}) K_3 D_3 च (for तु). — ^{d}) D_{n1} D_1 T_1 $G_{1.3}$ बल$^{\circ}$ (for गुण$^{\circ}$).

73 ^{a}) K (K_2 missing) D_7 G_3 भे; D_3 M वै (for हि). $D_{2.9}$ $G_{2.3}$ नृपतेः. — ^{c}) K_3 अर्थ्यं वचो; K_5 B_2 अर्थयुक्तं. K_4 च चित्रं; D_3 पवित्रं; C_s विचित्रं (as in text). — ^{d}) K_5 $B_{1.3}$ $D_{7.8}$ G_5 भाषितं (for भाषितुम्).

74 D_2 om. 74-75; B_1 om. 74^{ab}. — ^{a}) B_2 अभ्याहरति; G_3 असौ वहति. — ^{b}) $K_{1.4}$ B_{2-4} D_{n2} $D_{1.3}$ विविधं; $K_{3.5}$ D_7 सततं (for विविधा). — ^{c}) D_1 सा वै दुर्भाषिता; G_3 सुभाषितेतरा (for सैव दुर्भा$^{\circ}$). — ^{d}) G_1 M $^{\circ}$कल्पते (for $^{\circ}$पद्यते).

75 =(var.) C. 13. 4987; =(var.) Pañcatantra 3. 112. — D_2 om. 75 (cf. v. l. 74). — ^{a}) $K_{1.4.5}$ $D_{3.5}$ G_3 दुखुणा (for शरैर्). K_3 B D_n D_3 $D_{5-7.9.10}$ T_2 रोहते सायकैर्विद्धं. — ^{b}) D_5 (after corr. as in text).$_4$ वनं (for वनं). — ^{c}) $K_{3.5}$ D_3 D_1 बीभत्सुं (D_1 $^{\circ}$त्सुः); $C_{a.d.s}$ बीभत्सं (as in text).

76 =C. 13. 4988. — ^{a}) B D (except D_n D_2 $D_{3.5}$) $G_{3.5}$ कर्णिनालीकनाराचान्; D_{n2} D_2 $^{\circ}$नालिकनाराचाः; $C_{a.d}$ as in text. C_n cites कर्णी नालीकः, C_s कर्णिः नालिकाः नाराचाः. — ^{b}) K_{1m} T $G_{1.5}$ M निःसरंति; $G_{3.4}$ निष्पतंति; C_a निर्वहंति; $C_{d.s}$ as in text. $D_{3.4}$ शरीरिणः (D_5 $^{\circ}$णां); G_3 शरीरगाः. — ^{c}) D_1 $^{\circ}$शरः (for $^{\circ}$शल्यः). D_2 सेन (for तु न). G_1 न निर्गंतुं (for न निर्हर्तुं). K_5 न वाक्शल्यस्तु निर्हर्तुं. — ^{d}) K_3 स्वादुर्हरो (for हृदिशयो). — K_3 repeats 76^{cd} in marg. with v. l. as above.

77 =(var.) 1. 82. 11; =(var.) C. 2. 2192; =C. 12. 10999; =(var.) B. 13. 104. 32. — ^{a}) K_1 (after corr., as in text) निःसरंति (for निष्पतन्ति). — ^{b}) D_6 राजन्हतः (for यैराहतः). — ^{c}) D_8 (before corr., as in text) हे; D_{10} वा (for ना-). K_3 D_2 वै; D_3 ये (for ते). — ^{d}) D (except D_{1-4}) T_2 G_2 परेभ्यः (for परेषु).

78 =(var.) C. 2. 2679; =(var.) Śukasaptati (*text. simpl.*), p. 29. — ^{d}) B D_n $D_{3-6.8-10}$ T_2 G_2 $C_{s.ap}$ अपा(B_1 $D_{4.6}$ T_2 $^{\circ}$वी)चीनानि; T_1 $G_{1.3-5}$ M अपनीतानि; $C_{a.d}$ as in text. $K_{1.3}$ (m as in text).$_4$ न स पश्यात्मनो हितं. — After 78, K_3 ins. 192* (cf. v. l. 79).

79 =(var.) C. 2. 2680; =(var.) Śārṅgadharapaddhati 1319; =(var.) Pañcatantra (*text. simpl.* ed. Kielhorn and Bühler) 3. 184. — ^{b}) K_3 D_8 T_1 समुप$^{\circ}$; K_3 $D_{1.7}$ G (except G_2) पर्युप$^{\circ}$; M_3 प्रत्यव$^{\circ}$

C. 5. 1177 B. 5. 34. 18 K. 5. 34. 84

सेयं बुद्धिः परीता ते पुत्राणां तव भारत ।
पाण्डवानां विरोधेन न चैनामवबुध्यसे ॥ ८०
राजा लक्षणसंपन्नस्त्रैलोक्यस्यापि यो भवेत् ।
शिष्यस्ते शासिता सोऽस्तु धृतराष्ट्र युधिष्ठिरः ॥ ८१
अतीव सर्वान्पुत्रांस्ते भागधेयपुरस्कृतः ।
तेजसा प्रज्ञया चैव युक्तो धर्मार्थतत्त्ववित् ॥ ८२
आनृशंस्यादनुक्रोशाद्योऽसौ धर्मभृतां वरः ।
गौरवात्तव राजेन्द्र बहून्क्लेशांस्तितिक्षति ॥ ८३

इति श्रीमहाभारते उद्योगपर्वणि चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

धृतराष्ट्र उवाच ।
ब्रूहि भूयो महाबुद्धे धर्मार्थसहितं वचः ।
शृण्वतो नास्ति मे तृप्तिर्विचित्राणीह भाषसे ॥ १
विदुर उवाच ।
सर्वतीर्थेषु वा स्नानं सर्वभूतेषु चार्जवम् ।
उभे एते समे स्यातामार्जवं वा विशिष्यते ॥ २
आर्जवं प्रतिपद्यस्व पुत्रेषु सततं विभो ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ ३
यावत्कीर्तिर्मनुष्यस्य पुण्या लोकेषु गीयते ।
तावत्स पुरुषव्याघ्र स्वर्गलोके महीयते ॥ ४

(for प्रत्युप°). — c) G3 नयरूपेण (for नयसंकाशो). — d) B3 G3 उप° (for अप°). M बुद्धिमाक्रम्य तिष्ठति. — T1 G1.4.5 ins. after 79: K2, after 78:

192* न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥

[=(var.) 5. 35. 33. — (L. 2) K2 सद्बुध्या ये जयंति (for बुद्ध्या संयो°).]

80 b) B D T2 G3.6 भरतर्षभ (for तव भारत). — c) D5 निरो° (for विरो°). — d) K3.5 तत्वं; D8 न त्वं (for न च). K3.5 नैव; D8 चैव; B Dn D2-4.7.10 T G एना(T1 G3 °ता)न् (for एनाम्). K1 अवकुध्यसे; D5 D10 अवमन्यसे; D7 G3.6 भावबुध्यसे; D2 अनुबुध्यसे.

81 81ab=(var.) 5. 88. 21ab; =line 1 of 168*. — a) B3.4 Dn1 D8 D1.5.6.9 G3.6 M राजलक्षणसंपन्नः (D1 °युक्तः). — b) D8 अधिपो (for अपि यो). M3 सं- (for यो). — c) D8 (sup. lin.).9 पुत्राः; G3 श्रेष्ठाः; C3 शिष्यः (as in text). Ca cites शासिता. T1 G चैव (G2 वै तु) (for सोऽस्तु). K1.4.5 शिष्यस्ते शाधि तस्मात्वं (K1 °त्वं).

82 a) K (K3 missing) D2-3 G3 अतीव; Ca अतीव (as in text). K2 स च; D8 शत्रुः (for सर्वान्). — b) Cn भागधेये; C3 °दैव- (for °धेय-). — c) D1 पूजया (for प्रज्ञया).

83 a) K2 B D (except D5.8) T2 G3 Ca.d.s transp. आनृशंस्यात् and अनुक्रोशात्. — d) D2 T1 G1.4.5 तितिक्षते. — Ca reads 83cd as in text.

Colophon. K3 missing. — Sub-parvan: K2.4 संजययान; B Dn D5 D3-6.8.10 T2 M प्रजागर; G3 विदुरप्रजागर. — Adhy. name: K1.2.5 D1.3.7 G3 विदुरवाक्यं; K4 विदुरवाक्र (sic); T1 G1 हिताहितविवेकः; M हितोपदेशः (M3 °शं). — Adhy. no. (figures, words or both): K1 D5 33; K3 2 (of प्रजागरपर्व?); D6 (sec. m.) 31; D7.8 S 34 (M 35). — S'loka no.: K2 78; K5 83; Dn D8 86; G3 87; M3 84.

35

☞ This adhy. is missing in K3 (cf. v. l. 5. 32. 15).

1 K4 om. 1. — d) K1.2 (before corr. as in text) B (except B4) D1 हि; D9 प्र- (for इह). K3 G3 भाषते; D1 शंस मे.

2 a) D3.4.9 G2 च; D7 यत् (for वा). K1.4 G3.6 M सर्ववेदेषु वास्त्रा(K4 °वास्मा)नं. — b) D5 (m as in text) °तीर्थेषु (for °भूतेषु). K2 B3 D2 G1 वा (for च). — c) B Dn D5 D3.6.8 T2 स्वेते; D3.4 ह्येते; D10 चैते (for एते). G (except G2) M उभावेतौ समौ स्यातां. — d) K1.2 D1.10 G3 Cd तु; K4.5 Dn1 D7-9 च; Ca वा (as in text).

3 b) K2 स्वेषु तेषु च; D7 तेषु भारत (for सततं विभो). — d) G3 अवाप्नुहि (for °प्स्यसि).

4 b) K5 B1 Dn D8 D6.7.10 T2 लोके प्र- (for लोकेषु). T1 G (except G3) M लोके भवति भारत.

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
विरोचनस्य संवादं केशिन्यर्थे सुधन्वना ॥ ५

केशिन्युवाच ।

किं ब्राह्मणाः स्विच्छ्रेयांसो दितिजाः स्विद्विरोचन ।
अथ केन स पर्यङ्कं सुधन्वा नाधिरोहति ॥ ६

विरोचन उवाच ।

प्राजापत्या हि वै श्रेष्ठा वयं केशिनि सत्तमाः ।
अस्माकं खल्विमे लोकाः के देवाः के द्विजातयः ॥ ७

केशिन्युवाच ।

इहैवास्स्व प्रतीक्षाव उपस्थाने विरोचन ।
सुधन्वा प्रातरागन्ता पश्येयं वां समागतौ ॥ ८

विरोचन उवाच ।

तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
सुधन्वानं च मां चैव प्रातर्द्रष्टासि संगतौ ॥ ९

सुधन्वोवाच ।

अन्वालभे हिरण्मयं प्राह्रादेऽहं तवासनम् । C. 5. 1195 B. 5. 35. 14 K. 5. 35. 16

— c) D3–4 T3 पुरुषव्याघ्रः; G3–5 M °श्रेष्ठ (G1 M1 °श्रेष्ठः).

5 d) K3 महात्मनः; D8 सुधन्वनः. — After 5, Dn D3 (marg.).3.4.5 (marg.).8 T3 ins.:

193* स्वयंवरे स्थिता कन्या केशिनी नाम नामतः ।
रूपेणाप्रतिमा राजन्विशिष्टपतिकाम्यया ।
विरोचनोऽथ दैतेयस्तदा तत्राजगाम ह ।
प्राप्तुमिच्छंस्ततस्तत्र दैत्येन्द्रं प्राह केशिनी ।

6 a) D8 ब्राह्मणः. K3m D2.7 वै; M3.4 स्विद्ध; Ca.d.8 स्वित् (as in text). — b) G1 (before corr.).3 च; G3.4 स्तु: (for स्वित्). — c) Dn1 D3–5 T3 (before corr.) अस्य (for स). K4 G3 पर्यंके; C8 पर्यंकं (as in text). S (except G2; T2 by corr.) इदं (M3–5 इमं) व्यवस्य पर्यंकं. — d) K3 नाधिगच्छति; K4 नानु°; D1 ह्यधि°; D3 वाधि°; S (except T3 G3) -न्यधिरोहतु.

7 After the ref., K3 reads 9. — a) Dn1 D1.3 M3 प्रजापत्याः (D3 °त्यां). B3 Dn D2.4 T3 तु वै; D3 -स्य वै; D5 G (except G3) M वयं (for हि वै). — b) D3 सदा; S (except T3 G3) सर्वे; Cd वयं (as in text).

8 a) K3 अथ; K3m.5 B Dn D3 D5–8.10 Cap आवां; K4 आस्थ; D1 अप्सु; D5 आस्व; Ca.d आस्स्व (as in text). D3 प्रतीक्षाम; Cd.8 as in text. S (except T3 G3; G4 damaged) इह त्वं वस वै भोगाः (T1 G1 °ग्याः). — b) K1.3.4 D5 उपस्थानं; T1 G3.4 M स्वधर्मो मे; G1 स्वधर्मो मे; G5 स्वाधर्मेह; Ca.d.8 उपस्थाने (as in text). — d) K1.4 D8 वा (for वां).

9 K3 om. the ref. and reads 9 after the ref. of 7. — b) M3 यथार्थं (for यथा त्वं). G3 अभि- (for भीरु). M वक्ष्यसि (for भाषसे). — c) S (except T3 G3) उभौ (for एव). — d) K3 M द्रक्ष्यसि (for द्रष्टासि). — After 9, K1.5 B (except B1) Dn D3 D1.2.5–8 T3 G1 ins.:

194* अतीतायां च शर्वर्यामुदिते सूर्यमण्डले ।

[K1 D3 प्रभातायां (for अतीतायां). D7 ततो रात्र्यां व्यतीतायां (for the prior half).]

Dn1 D3.7.8 T3 cont.: K4 D3.4.9 G3 ins. after 9:

195* अथाजगाम तं देशं सुधन्वा राजसत्तम ।

K4 Dn1 D3–4.7–9 T3 cont.:

196* विरोचनो यत्र विभो केशिन्या सहितः स्थितः ।
[D3 सह संगतः (for सहितः स्थितः).]

— Dn1 D3–4.9 (all om. line 1) T3 cont.: K1.5 B (except B1) Dn3 D5 D1.2.6 ins. after 194*: D10 (which om. 9cd) ins. after 9ab:

197* सुधन्वा च समागच्छत्प्राह्रादिं केशिनीं तथा ।
समागतं द्विजं दृष्ट्वा केशिनी भरतर्षभ ।
प्रत्युत्थायासनं तस्मै पाद्यमर्घ्यं ददौ पुनः ।

[(L. 1) B3.4.5 Dn D5 D8 सुधन्वानं (for °न्वा च). K1 वै; K3 D5 तं; D1 तु; D10 तां (for च). K1 प्रति (for तथा). K3 प्रह्रादिमकनीयसिं; Dn D5 D3.8 प्राह्रा(D5 D8 °ह्ला)दिः केशिनी तथा. — (L. 2) K1.5 तमा° (for समा°). — (L. 3) D3 D1 पाद्या(D3 °द्य)र्घं प्र(D1 च)ददौ (for पाद्यमर्घ्यं ददौ). G3 मनुत्तमं (for ददौ पुनः).]

— T3 G3.5 M ins. after 9: G1, after 194*:

198* एतस्मिन्नन्तरे तत्र सुधन्वा प्रत्यदृश्यत ।
इति होवाच वचनं विरोचनमनुत्तमम् ।

10 S (except T G3 M5) om. the ref. — a) D3.4.9 समालभे; D7 अन्वारभे; Ca.d as in text. K3 अन्वारुहेयं रम्यं वै; S (except T3 G3) आस्स्व तल्पे हि सौवर्णे. — b) K4.5 Dn1 D3.4.8 T3 G3.4 M प्राह्लादे; Dn1 Dn2 D1.9 T1 G1 प्रह्लादे. B Dn D3.10 T3 ते (D3 T3 -हं) वरासनं; D3 D3.4 तव चासनं; S (except T3 G3) ब्राह्मणस्त्वहं. — c) K3 समस्त्वं; D1 एवं त्वं; S (except T3 G3) एकांतं; Ca.d.8 एकत्वं (as in text). K3.5 अनुसंपन्नौ; Ca.d as in text. — d) K4.5 B D (except Dn D1.3.7.8) T3 आसेहं; Ca.d आसेवं (as in text).

C. 5. 1196
B. 5. 35. 14
K. 5. 35. 15

एकत्वमुपसंपन्नो न त्वासेयं त्वया सह ॥ १०

विरोचन उवाच ।

अन्वाहरन्तु फलकं कूर्चं वाप्यथ वा बृसीम् ।
सुधन्वन्न त्वमर्होऽसि मया सह समासनम् ॥ ११

सुधन्वोवाच ।

पितापि ते समासीनमुपासीतैव मामधः ।
बालः सुखैधितो गेहे न त्वं किंचन बुध्यसे ॥ १२

विरोचन उवाच ।

हिरण्यं च गवाश्वं च यद्वित्तमसुरेषु नः ।
सुधन्वन्विपणे तेन प्रश्नं पृच्छाव ये विदुः ॥ १३

सुधन्वोवाच ।

हिरण्यं च गवाश्वं च तवैवास्तु विरोचन ।
प्राणयोस्तु पणं कृत्वा प्रश्नं पृच्छाव ये विदुः ॥ १४

विरोचन उवाच ।

आवां कुत्र गमिष्यावः प्राणयोर्विपणे कृते ।
न हि देवेष्वहं स्थाता न मनुष्येषु कर्हिचित् ॥ १५

सुधन्वोवाच ।

पितरं ते गमिष्यावः प्राणयोर्विपणे कृते ।

---

11 G3 om. 11^{a}–13^{b}. — a) K1.5 D2.3 अथा(D3 °ध्या)हरंतु; B Dn D5 D8.9.10 तवाहरेंते तु; T3 हरंतु कूर्चं (for अन्वाहरन्तु). Cd.n cite अधः. K3 D2.7.8 T3 फलकीं; B (except B4) D5 फलकीं; Ca.d.s as in text. K5 D8.9.9 तवाहं फलकं मह्यन्; D1 अथाह तृचफलकं; T1 G (G3 om.) M हरन्तु फलकं (T1 G1 M4.5 °कां; M3 °कौ) कूर्चं. — b) T3 बर्हीं; Ca.d.s कूर्चं (as in text). K1.2.4 D7 तृणीं; K4 B1–3.5 Dn1 D5 D4.6.9.10 C3 वृषीं; B4 D3 Cn वृसीं; D1.2.3 T3 Ca.d वृषीं (for बृसीम्). T1 G (G3 om.) M तथा तु(T1 °थ्य; M3–5 तु)स्तरणानि च. — After 11^{ab}, D1 ins.:

199* न मत्तो ह्यधिकोऽसि त्वं गुणतो जन्मतोऽपि वा ।

— c) Dn2 transp. सुधन्वन् and न. — d) K3 समासितुं; D1 समासनं; D10 सहा°; Ca समा° (as in text). S (except T3; G3 om.; G4 damaged) सहासीना (T1 G3 °सिद्धा) मया सह.

12 G3 om. 12 (cf. v. l. 11); Dn1 om. 12–13. — After the ref., K3 D2.8 ins. the foll. stanza (which is reproduced in some of the old printed ed.):

200* पितापुत्रौ सहासीतां द्वौ विप्रौ द्वौ च पार्थिवौ ।
द्वौ चैव वैश्यौ शूद्रौ च न त्वन्याविति स्थितिः ॥

[(L. 1) Bom. and Kumbh. ed. क्षत्रियावपि (for द्वौ च पार्थिवौ). — (L. 2) D1 द्वावेव वैश्यौ द्वौ शूद्रौ (for the prior half).]

— a) B D (except D1.2.7) G1 (before corr. as in text) M4 हि (for अपि). M (except M3) सहा° (for समा°). — b) K3 उपासीते च; T1 G1 उपासीतापि; G2.4 M उपोपासीत (for उपासीतैव). G6 विपणा चास्तु केशिनी. — c) K4 D6 सुखोषितो (for सुखैधितो). S (except T3; G3 om.) बालो गृहेषु सुखितो. — d) K1 D7 बोधिषि; K4 D9 जानासि; D1 बुध्यसि (for किंचन). K1.4 D1.7.8 किंचन (for बुध्यसे). K3.5 बुध्यसे त्वं न किंचन; G6 न त्वं किं नावबुध्यसे.

13 Dn1 om. 13 (cf. v. l. 12); G3 om. 13^{ab} (cf. v. l. 11). — a) = 14^{a}. G6 चैव गावः; G5 च गवाश्वान्; M मधुपर्कं (for च गवाश्वं). — b) K5 D1.2 असुरे पुनः (for असुरेषु नः). K1 D7.8 च (for नः). — c) K2 D7 विपणं (for विपणे). T1 G4 M (M1 inf. lin. as in text) तस्य नः (T1 सः) कृत्यं (for विपणे तेन). — d) = 14^{d}. G3 प्राज्ञं; G5 प्राज्ञान् (for प्रश्नं). K3 Dn1 D5 m. 10 G5 पृच्छामहे (G5 °म ये); M1 (sup. lin.).2 गच्छाव ये (for पृच्छाव ये). K3 विदुं; Dn1 D10 त्रिवर्गं (for विदुः). Cd cites ये विदुः.

14 T1 M4 om. 14; D8 om. 14^{bcd}. — a) = 13^{a}. G5 सुवर्णं (for हिरण्यं). G5 M1–3 चैव गावः; G6 च गवाश्वान् (for च गवाश्वं). — b) K1 Dn1 D5 D2.7.8 T3 G5 M3 तथा (for तव). G5 विरोचनः (for विरोचन). — c) G1.5 M (M1 inf. lin. as in text; M3 om.) प्राणयोरेव नः कृत्यं. — d) = 13^{d}. K3 पृच्छामहे; G1.5 M1 (inf. lin. as in text).2.3 गच्छाव ये.

15 a) K1 B1 D7 T3 तौ वै; K2 तौ च; K4 तं तौ (for आवां). D8 आवां क्व नु गमिष्यामः (sic); T1 G1.2–6 M ते वयं (G4 तावावां) क्व गमिष्यामः. — b) = 16^{b}. G4.5 M (M1 inf. lin. as in text) एवमंतरे (for विपणे कृते). — c) K3 B D (except D1.7–8) तु; T3 तु (for हि). D8 अवस्थाता; T1 G1.2.4.5 M (M1 inf. lin. as in text) संस्थानं; G6 अधिष्ठानं (for अहं स्थाता). — d) T1 मनुष्येष्विह तिष्ठतः; G1.2.5 M (M1 inf. lin. as in text) मनुष्येष्विह (G1.5 °षु हि; G6 °षु च) तिष्ठतः (G5 °ति).

16 K4 om. 16. — a) D8 प्रह्लादं नौ (for पितरं ते).

पुत्रस्यापि स हेतोर्हि प्रह्लादो नानृतं वदेत् ॥ १६

प्रह्लाद उवाच ।

इमौ तौ संप्रदृश्येते याभ्यां न चरितं सह ।
आशीविषाविव क्रुद्धावेकमार्गमिहागतौ ॥ १७
किं वै सहैव चरतो न पुरा चरतः सह ।
विरोचनैतत्पृच्छामि किं ते सख्यं सुधन्वना ॥ १८

विरोचन उवाच ।

न मे सुधन्वना सख्यं प्राणयोर्विपणावहे ।
प्रह्लाद तत्त्वां पृच्छामि मा प्रश्नमनृतं वदीः ॥ १९

प्रह्लाद उवाच ।

उदकं मधुपर्कं चाप्यानयन्तु सुधन्वने ।
ब्रह्मन्नभ्यर्चनीयोऽसि श्वेता गौः पीवरीकृता ॥ २०

सुधन्वोवाच ।

उदकं मधुपर्कं च पथ एवार्पितं मम ।
प्रह्लाद त्वं तु नौ प्रश्नं तथ्यं प्रब्रूहि पृच्छतोः ॥ २१ C. 5. 1206 B. 5. 35. 27 K. 5. 35. 28

T1 G2.3 गमिष्यामः. — b) = 15b. S (except T2 G2) एवमंतरे (for विपणे कृते). — c) D7 तु (for हि). K1 पुत्रस्यापि हिते प्रश्नं; K3 पुत्रस्य हेतोरपि सः; S (except T2 G2) अपि पुत्रस्य चेत् (G4 वै) हेतोः. — d) K1 B1.3-5 Dn2 D3.5-7.9.10 T G1.3 प्रह्लादो (as in text); the rest प्रह्रादो. — After 16, K2.4.5 D (for D2 see below) T1 (om. line 2).2 G (G4 damaged; all G om. line 2) M1 (om. line 2) ins.:

201* विदुर उवाच ।
एवं कृतपणौ क्रुद्धौ तत्राभिजग्मतुस्तदा ।
विरोचनसुधन्वानौ प्रह्लादो यत्र तिष्ठति ।

[(L. 1) K2.5 T1 G2-5 M1 om. the ref. K2.5 D7 T1 G M1 एवमुक्त्वा गतौ तौ तु (K2.5 ततस्तौ; D7 गतौ शीघ्रं); K4 D8 D10 एवं कृतमानपणौ; D2 एवं विपणमास्थाय; D5 एवं कृतपणौ तौ तु; D6 T2 एवं कृत्वा तु तौ क्रुद्धौ (for the prior half). K2.5 प्रह्लादं प्रतिजग्मतुः; D1 प्रह्लादस्यांतिकं गतौ; D3-5.8-10 T2 क्रुद्धौ (D3.4.8 उभौ; D9 तौ तु) तत्राभिजग्मतुः; D7 प्रह्लादस्य निवेशनं; T1 G (G4 damaged) प्रह्लादं दितिनंदनं (for the posterior half). — (L. 2) D3 D5.6 प्रह्लादो. D7 -प्यत्र (for यत्र). K2.5 विरोचनस्तु प्राह्लादिः सुधन्वांगिरसश्च यः (K5 सः); D1 सुधन्वानं [तु?] दृष्ट्वैव प्रह्लादो वाक्यमब्रवीत्.]

— On the other hand, D2 ins. after 16:

202* इत्युक्त्वा जग्मतुस्तौ तु प्रह्लादस्य गृहं प्रति ।
गत्वा तं ददृशुस्तत्र दैत्यानामीश्वरं तदा ।
तावागतावभिप्रेक्ष्य प्रह्लादो विस्मितस्तदा ।
पप्रच्छागमने हेतुं उभयोर्दितिजस्ततः ।

17 Some MSS. प्रह्लाद in the ref. — a) D3 यूसौ (for इमौ). D1 मम दृश्येते; D6 विप्र°; M (M1 sup. lin. as in text) प्रतिगृह्येते (for संप्र°). — b) K3 द्वाभ्यां; S (except T2 G2) ययोः (for याभ्यां). K3 चरितुं; Ca.d.3 चरितं (as in text). — c) M आस्तां च (for क्रुद्धौ). — d) K2 B D (except D1.7) T2 मार्गौ (for मार्ग°). K1 उपस्थितौ; K3 अनुस्थितौ (for इहागतौ). T1 G1.3.5 एकमार्गगतावुभौ; M क्रुद्धावेकाशयं गतौ.

18 a) K1.4 D1.2.8 T2 Ca.d किं वां; G3 किंचित् (for किं वै). K2.5 B3-5 D (except Dn1 D1.2.5) T2 एवं; Ca एव (as in text). K1.4 D1.2 G2 Ca.d चरितं; B Dn Dn2 D3-5.7.10 चरथो; D6 सुरथौ (marg. sec. m. सुहृदौ). — b) K1.4 B D (except D2.3.9) T2 G2 Ca.d चरथः (for °तः). — After 18ab, K3 ins.:

203* तत्त्वां सुधन्वन्पृच्छामि मा पृष्टमनृतं वदीः ।

19 a) Some MSS. प्रह्लाद. K1.3 B3 D3-7.10 T2 तत्त्वं (for तत्त्वां). K1.3 D1.2.7 G3 पृच्छावो (D7 °मो); Dn2 गच्छामि. K4 D3.4.8 प्रह्लादैतद्विजानीहि; T1 G1.2.3 Mतत्त्वा (G3 M1 inf. lin. त्वां तु; M1-4 तत्त्वं) पृच्छावहे तात. — c) K3 D10 पृष्टं; D9 सार्धं (for प्रश्नं). K1.4 B4 D1.3-6 T2 वदेः; B3 T1 G2.3 वद (for वदीः). — After 19, M2 ins. (cf. v. l. 21):

204* प्रह्लादः ।
न कल्माषो न कपिलो न कृष्णो न च लोहितः ।
अणीयान्क्षुरधारायाः को धर्मं वक्तुमर्हति ।
सुधन्वा ।
यथातथ्यं वक्ष्यसि त्वं यदि वा नापि वक्ष्यसि ।
प्रह्लाद प्रश्नमनघं मूर्धा ते विफलिष्यति ।

20 M2 om. 20–23. — Some MSS. प्रह्लाद in the ref. — ab) K4 B3.4 Dn D3 D1-4.10 वा; D9 वां (for च). K1 D3 आनयध्वं; K3 D7 अप्यानयध्वं; D1 प्रयच्छंतु; D9 आनयंतु (for अप्या°).

21 M2 om. 21 (cf. v. l. 20). — b) K1 D7.8 सर्वमेव; K3 B Dn2 D3-6 T2 पथिष्वेव; D2 तव पंच°; D10 यथावद्; T1 G1.3 M (M2 om.) प्रश्न एव (T1 G1 -वाचा); G2 त एव हि; Ca.d.3 पथ एव (as in text). G3 कांक्षितं; C3 अर्पितं (as in text). B3 D2 मया; C3 मम (as in text). K4 D9 तथैवास्तु सुरोत्तम (D6 सुरेश्वर); G3

C. 5. 1210
B. 5. 35. 23
K. 5. 35. 20

प्रह्राद उवाच ।

पुत्रो वान्यो भवान्ब्रह्मन्साक्ष्ये चैव भवेत्स्थितः ।
तयोर्विवदतोः प्रश्नं कथमस्मद्विधो वदेत् ॥ २२
अथ यो नैव प्रब्रूयात्सत्यं वा यदि वानृतम् ।
एतत्सुधन्वन्पृच्छामि दुर्विवक्ता स किं वसेत् ॥ २३

प्रश्नान्तावर्षितं (sic) मम. — [cd]) Some MSS. प्रह्राद; D8 D10 पृच्छाम (D10 °व) (for प्रह्राद). K1 त्वं हि; K4 D5 पूर्वं तु; D1 त्वं च; D3.4 ब्रूहि; T1 G1.3 इदं (T1 इमं) तु; G3 M (M3 om.) एतं तु (for त्वं तु). K4 D5 G3 नः; B Dn D3.8 T G1.2 मे; Cd.3 नौ (as in text). K4 B Dn D8 D3–7.9.10 T2 G2 transp. प्रश्नं and तथ्यं. D1 तत्वं; D3 पथ्यं (for प्रश्नं). K3 प्रह्राद तव प्रश्नोऽस्ति. D1.3 प्रश्नं; T1 G1.3.5 M1.3.4 तत्वं (for तथ्यं). D3.4 त्वं चैव (for प्रब्रूहि). K4 B Dn D1.3.4.6.9 T1 G1.3.5 पृच्छतः (D1.3 °तो; D3 °तां). — After 21, N (except D5; K3 missing) T2 G1.3 ins.:

205* किं ब्राह्मणाः स्विच्छ्रेयांस उताहो स्विद्विरोचनः ।

[=(var.) 6[ab]. K3 B1.3 D3.7.10 G3 वै; D1 अहं (for the first स्वित्). D1 श्रेयः स्याम् (for श्रेयांस). K1.3 विरोचन. B3 उत्ता गौः पीवरी कृता (for the posterior half).] K3 cont.:

206* सत्यं प्रब्रूहि दैत्येन्द्र सत्यं हि परमं तपः ।

Lines 1–2 of 204* are ins. in G1 after 205*, in T1 G3–5 M1.3–5 after 21; in M3–5, they are followed by lines 3–4 (with v. l.) of the same passage.

22 M2 om. 22 (cf. v. l. 20); M3–5 om. 22–23. — Some MSS. प्रह्राद in the ref. — [a]) K4 B Dn D5 D3–7.10 T2 Cap पुत्र एको; K3 D5 Cd पुरोधान्यो; T2 G (except G2) M1 अभिवाद्यो (for पुत्रो वान्यो). K1.3 D1.3.9 T1 G (except G2) M1 भवेत्; K4 B Dn D5 D3–7.10 T2 Cap मम (for भवान्). Cn पुरोधा ममान्यो ब्रह्मन्. — [b]) D1 सत्यं (for साक्ष्ये). K1.3 m D1.3 तथा; K4 भवान् (for भवेत्). B Dn D5 D3–7.8.10 T2 Cap त्वं च साक्षादिहास्थितः; Cn त्वं च साक्ष्य इव स्थितौ. Cd cites साक्ष्ये and स्थितौ. — [c]) D1 द्वयोः (for तयोः). K3 अन्यत्; G3 प्रश्नं (for प्रश्नं). — [d]) B1 T2 भवेत् (for वदेत्). — Lines 3–4 of 204* are ins. (with v. l.) in T1 G (except G3) M1 after 22, in M3–5 after 194*. — T1 G (except G2) M1 cont.:

207* विदुरः ।
आविवेश सहायान्तं प्रह्रादो हंसमब्रवीत् ।
धृतराष्ट्र महाप्राज्ञं सर्वज्ञं प्रियदर्शनम् ।
प्रह्रादः ।
पुत्रवान्यो भवेद्ब्रह्मन्साक्ष्ये चापि भवेत्स्थितः ।
तयोर्विवदतोर्हंस कथं धर्मः प्रवर्तते ।

[(L. 2) M1 सर्वदर्शिनं (for प्रिय°). — (L. 3) G3.4 धीतवान् (for पुत्रवान्), and साक्षी (for साक्ष्ये).] — T1 G1.3–5 cont.: K4 B D T2 G2 ins. after 22:

208* सुधन्वोवाच ।
गां प्रदद्यात्स्वौरसाय यद्वान्यस्मात्प्रियं धनम् ।
द्वयोर्विवदतोस्तथ्यं वाच्यं च मतिमंस्त्वया ।

[T1 G1.3 हंसः (for सुधन्वो°). — (L. 1) K4 B1 D (except Dn D5 D10) T2 G2 गाः (for गां). T1 G (except G2) वै दद्यात्; Ca.d प्रदद्याः (as in text). D23 D5 T1 G (except G2) Ca.d औरसाय (for स्वौ°). D5 च; G3.4 अस्य (for अन्यत्). — (L. 2) B3 T1 G (except G2) तयोः (for द्वयोः). T1 G (except G2) राजन् (for तथ्यं). K4 B1 D5 D3–4.7.8 तु; G2 तत् (for च). T1 G1.3 प्रश्नं सत्यं यथा वदेत्; G3.4 यथा धर्मस्ततो वदेत्.]

23 M om. 23 (cf. v. l. 20, 22). Before 23, K4 B D T G ins. प्रह्राद उ° (resp. प्रह्रादः). — [a]) K1.3 D2.7 G2 तद् ब्रूयात्; D3 तु ब्रूयात्; T1 G1.3–5 विब्रू°; Ca प्रब्रू° (as in text). — [b]) D3 T1 G (except G2) न सत्यं नानृतं वदेत् (D3 नरः). — [cd]) D1 कां (for किं). Ca किंवान; Cd किं वसेत् (as in text). T1 G (except G2) हंस तत्वं च पृच्छामि किमयं नः करोति सः. — T1 G (except G2) ins. after 23: M1 (which om. 23), after 22:

209* हंसः ।
पृष्टो धर्मं न विब्रूयाल्लोभकर्णैश्शिथिलं चरन् ।
धर्मोऽभ्यस्यति राजंस्तु नास्य लोकोऽस्ति न प्रजाः ।
धर्मं एतान्संसृजति यथा नद्यनुकूलजान् ।
ये धर्ममनुपश्यन्तस्तूष्णीं ध्यायन्त आसते ।
श्रेष्ठोऽर्धं तु हरेत्तत्र भवेत्पादश्च कर्तरि ।
पादश्चैव सभासत्सु यत्र निन्द्यो न निन्द्यते ।
अनेना भवति श्रेष्ठो मुच्यन्ते च सभासदः ।
कर्तारमेनो गच्छेच्च निन्द्यो यत्र हि निन्द्यते ।
प्रह्रादः ।
मोहाद्वा चैव कामाद्वा मिथ्यावादं यदि ब्रुवन् ।
धृतराष्ट्र त्वां पृच्छामि दुर्विवक्ता तु कां वसेत् ।

[Cf. 214*. — (L. 2) T1 G3 राजा (for राजन्). — (L. 3) T1 G3 स एजति. — (L. 5) G3.4 अर्थं (for अर्धं), and पादं (for पादः). — (L. 7) G3.4 मुच्यते (for मुच्यन्ते). T1 G1.3 अपि (for च). — (L. 8) M1 निन्दार्हो यत्र निंद्यते. — (L. 10) G1.3.4 तत्वं (for त्वां). T1 G3 M1 नु (for तु). M1 कं (for कां).]

सुधन्वोवाच ।

यां रात्रिमधिविन्ना स्त्री यां चैवाक्षपराजितः ।
यां च भाराभितप्ताङ्गो दुर्विवक्ता स तां वसेत् ॥ २४

नगरे प्रतिरुद्धः सन्बहिर्द्वारे बुभुक्षितः ।
अमित्रान्भूयसः पश्यन्दुर्विवक्ता स तां वसेत् ॥ २५

पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ २६

हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।
सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः ॥ २७

प्रह्राद उवाच ।

मत्तः श्रेयानङ्गिरा वै सुधन्वा त्वद्विरोचन ।
माताস्य श्रेयसी मातुस्तस्मात्त्वं तेन वै जितः ॥ २८

विरोचन सुधन्वायं प्राणानामीश्वरस्तव ।
सुधन्वन्पुनरिच्छामि त्वया दत्तं विरोचनम् ॥ २९

सुधन्वोवाच ।

यद्धर्ममवृणीथास्त्वं न कामादनृतं वदीः ।
पुनर्ददामि ते तस्मात्पुत्रं प्रह्राद दुर्लभम् ॥ ३०

एष प्रह्राद पुत्रस्ते मया दत्तो विरोचनः ।
पादप्रक्षालनं कुर्यात्कुमार्याः संनिधौ मम ॥ ३१

विदुर उवाच ।

तस्माद्राजेन्द्र भूम्यर्थे नानृतं वक्तुमर्हसि ।
मा गमः ससुतामात्योऽत्ययं पुत्राननुभ्रमन् ॥ ३२

न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम् ॥ ३३ C. 5. 1222 B. 5. 35. 40 K. 5. 35. 51

---

24 G1 M (except M1) om. the ref. T1 G2-3 M1 हंसः (for सुधन्वा). — a) M (M1 sup. lin. as in text) या; C8 स्त्री (as in text). — b) M (M1 sup. lin. as in text) स्त्रिया वा (for यां चैव). B1.3.5 D5.6 अक्षे (for अक्ष-). D2 -पराजितां. — c) D8 यथा; D2 यं च (for यां च). T1 G (G1 by corr. as in text; G4 damaged) M यां च भाराभितप्ता गौः (M1 inf. lin. °पद्मास्ये). — d) $=25^{d}$. S (except T2 G2; G4 damaged) तु (for स). M1 (inf. lin.) कुलां (for स तां).

25 a) D3 D13 °बद्धः; D1 °विद्धः (for °रुद्धः). D1 बहिर्मार्गे; D3 G (G4 damaged) M °द्वारो; D5.6.9 T1 °द्वारं. K3 बहिर्द्वारेषु रक्षितः. — c) K4 भूयः स; T1 भूयसं; M (M1 inf. lin. as in text) चैव तान्. B Dn D3 D5.6-7.10 पश्येत् (for पश्यन्). D5.6 अमित्रीभूय सर्वस्व. — d) $=24^{d}$. T1 G1.3.5 M तु; G4 स (for स). D8 व्रजेत् (for वसेत्). B Dn D3 D5.6.10 यः साक्ष्यमनृतं वदेत्. — After 25, S (except T2 G2) ins.:

210* यां च रात्रिमभिद्रुग्धो यां च मित्रे प्रिये मृते ।
सर्वस्वेन च यो हीनो दुर्विवक्ता तु तां वसेत् ।

[(L. 1) M अभिशेते (for अभिद्रुग्धो). T1 G2 पुत्रे (for मित्रे).]

26 =Manu 8. 98; =(var.) Pañcatantra 3. 109. — D2 transp. 26^{ab} and 26^{cd}. — a) K1 T1 G1(after corr.).3 पश्वानृते; D8 पंचा°; G1(before corr.).4.5 कन्या°; Ca पश्व° (as in text).

27 =Manu 8. 99. — b) B3 Dn1 Dn3 D1.6.8 T2 G3.4 वदेत्; G2 ब्रुवन् (for वदन्). — c) M सर्वान् (for सर्वं). K1 Dn3 D8 Cn भूम्यनृतं. — d) G2 अस्तु (for स्म). D8 हन्त्यनृतं; D10 हन्त्याकृतं (for भूम्यनृतं). K4 वद; B (except B4) D1.3.4 वदेः; D2 T2 G3.4 वदेत्; D10 वदन् (for वदीः).

28 Some MSS. प्रह्लाद in the ref. — a) Dcm पंडितो; Ca.d.s अंगिराः (as in text). — b) K3.5 B1.5 D8.4.7 G2 त्वत्त एव च; D1.2 G5 तु (D8 वै) विरोचनात् (for त्वद्विरोचन). Ca cites त्वत्तः, Cd.s त्वत्. — d) K4 तव त्वं; D1.2 G2 ततस् त्वं (G3 तु); T1 G2 M1 भवतः; G1.5 भवांस्तु; M2 भवतु; M3.4 भवसि; M5 भवति (for तस्मात्त्वं). G1.3 M2-5 एतेन (for तेन). K3 ततस्त्वं वै पराजितः; D10 तव पूज्यो द्विजस्ततः.

29 K1 om. 29^{a}–30^{b}. — a) K4 D8 वै (for अयं). — c) B1 D8.4.10 T1 G1 M1 (sup. lin. as in text) पुत्रं; D8 G3 पुत्र (for पुनर्).

30 K1 om. 30^{ab} (cf. v. l. 29). — a) B1 D8 यो; Ca तद् (for यद्). K4 योऽत्र धर्मं वृणीथास्त्वं. — cd) B3 D1 ददानि. K3.4 B D (except D7) T2 transp. तस्मात् and पुत्रं. Some MSS. प्रह्लाद (in this and the foll. stanza). G4 (by corr. from text reading) दुर्बलं (for दुर्लभम्).

32 a) D1 नरेंद्र (for राजेन्द्र). — d) K3 भवान्; B Dn D2 D5.6.8.10 T G (except G2) M1 मार्ग; D1 अनर्थं (for अत्ययं). B (except B1) Dn D2 D5.6.8.10 T2 पुत्रार्थमनुव्रजन् (for पुत्राननुभ्रमन्). K1.5 D2 G3.4 अनुस्मरन्; K3 D8 अनुव्रजन् (for अनुभ्रमन्). M3-5 यः पुत्राननुविभ्रमन्.

C. 5. 1273 B. 5. 35. 41 K. 5. 35. 52 यथा यथा हि पुरुषः कल्याणे कुरुते मनः ।
तथा तथास्य सर्वार्थाः सिध्यन्ते नात्र संशयः ॥ ३४

न छन्दांसि वृजिनात्तारयन्ति
मायाविनं मायया वर्तमानम् ।
नीडं शकुन्ता इव जातपक्षा-
श्छन्दांस्येनं प्रजहत्यन्तकाले ॥ ३५

मद्यापानं कलहं पूगवैरं
भार्यापत्योरन्तरं ज्ञातिभेदम् ।
राजद्विष्टं स्त्रीपुमांसोर्विवादं
वर्ज्यान्याहुर्यश्च पन्थाः प्रदुष्टः ॥ ३६

सामुद्रिकं वणिजं चोरपूर्वं
शलाकधूर्तं च चिकित्सकं च ।
अरिं च मित्रं च कुशीलवं च
नैतान्साक्ष्येष्वधिकुर्वीत सप्त ॥ ३७

मानाग्निहोत्रमुत मानमौनं
मानेनाधीतमुत मानयज्ञः ।
एतानि चत्वार्यभयंकराणि
भयं प्रयच्छन्त्ययथाकृतानि ॥ ३८

अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
पर्वकारश्च सूची च मित्रध्रुक्पारदारिकः ॥ ३९

भ्रूणहा गुरुतल्पी च यश्च स्यात्पानपो द्विजः ।
अतितीक्ष्णश्च काकश्च नास्तिको वेदनिन्दकः ॥ ४०

स्रुवप्रग्रहणो व्रात्यः कीनाशश्चार्थवानपि ।
रक्षेत्युक्तश्च यो हिंस्यात्सर्वे ब्रह्महणैः समाः ॥ ४१

---

33 =(var.) Pañcatantra (*text. simpl.*) 3. 182; =(var.) 193*. — a) B3.4.5 D (except D1.7.8) T2 वंचस् (for यदिम्). — c) G3 हि (for तु). — d) K1.2 B D T2 संविसजंति (as in text); the rest संयोजयंति.

34 b) D1.2.7 S (except T2; G4 damaged) मतिं (for मनः). — cd) G2 यथा यथा (for तथा तथा). K1.4 D2 हि; D9 अत्र (for अस्य). K1 सर्वाणि; S (except T2 G2) सिध्यंति (for सर्वार्थाः). S (except T2 G2) सर्वार्थो (for सिध्यन्ते).

35 =5. 43. 3. — a) N (except K1.2 D1; K3 missing) T2 नैनं; C8 न (as in text). G2 वृजिनं (for वृजिनात्).

36 a) K2 महापानं; K4 B D (except D2 D5.8.10) T2 Ca.p मद्यपानं; T1 G1 M मद्या(T1 °द्या)त्रपानं; G3.5 मध्वाम्लद्यपानं; Ca.d.s as in text. K1 D23 Ca.d.s विकलं; Cap कलहं (as in text). G4 पूर्वं° (for पूग°). — c) D1 G8 °द्वेषं (for °द्विष्टं). B3–5 D (except D5.9) T2 °पुंसयोर् (for °पुमांसोर्). B1 राजद्विष्टं पुंस्त्रियोश्चापि भेदं. — d) K4 D5.6 विवर्जयेद्; D2 त्याज्यानाहुर् (for वर्ज्यानाहुर्). D8 पंचातिरिक्तः (for पन्थाः प्रदुष्टः). K4 G3.4 सुदुष्टः; D5.9 तु दुष्टः (for प्रदुष्टः).

37 a) B1 G2 M (except M2) Ca.d.s सामुद्रकं. K3.5 B (except B4) Dn वाणिजकं; D8 D1.9 G2 वाणिजं (for वणिजं). K1.4 B3.5 D8 D1.2.3m.5 Cd.s चौरपूर्वं; K2 च चौरं; K5 B1 Dn D4.6.7 चौरपूर्वं; D5 चौर्यमुग्रं; G5 भोगपूर्वं (for चोरपूर्वं). — b) D1 T1 M Cd शाला(D1 T1 °ल)काधूर्तं; G5 शाढं धूर्तं; Ca.s as in text. G2 शालं धूर्तं वंचकं (for शलाकधूर्तं च). — d) K1 B (except B1) Dn D8 T2 G3–5 साक्ष्ये तु; M साक्षीन् (for साक्ष्येषु). D3–5.8.9 विप्रकुर्वति; G (except G1) M1 (*inf. lin.* as in text).3–5 अधि(M3.4 °ति)कुर्वंति (M2 °तु). G1–3 M काले (for सप्त).

38 =(var.) 1. 85. 24; cf. 182*. — a) T1 M3–5 °यज्ञः; G1.2 °यज्ञं (for °मौनं). — b) D8 T1 मानाधीतं; G1.3 मानाद्यधीतं; Ca as in text. T1 G1.2 M3–5 °मौनं (for °यज्ञः). — c) D1.3 T1 G (except G3) M1 (*inf. lin.* as in text) भयंकराणि; Ca.d.s अभयं° (as in text). — d) T1 G (except G3) M1 (*inf. lin.* as in text) श्रियं प्रयच्छंति यथाकृतानि. Ca.d cite अयथाकृतानि; Cs cites 38d as in text.

39 39ab = Manu 3. 158ab. Cf. Gautama-dharmasūtra 15. 17 (ed. Mysore, 1917, p. 255). — a) K3 (before corr.) D1.2.3 Cd आगार°; Ca as in text. M3.4 वरदः (for गरदः). — c) S (except T2) चर्म°; Ca.d पर्व° (as in text). Cs cites पर्वंवद्रकः. — d) K1 °याधिकः; K2 D1.7.8 °जाधिकः (for °दारिकः).

40 c) B1.2.3 S (G4 damaged) काकः; Ca.d.s काकः (as in text).

41 a) K1.4.5 Dn1 D1.7.8 G3 स्रु(Dn1 G3 स्रु)वमहर(K4 °श्रव)णो; B1.2 D8 स्रुव(D8 °त)प्रग्रहणो; D5.6 स्रुग्प्र°; G1.2 M स्रुवप्रहाण(G2 M1.3 °वाह)णो; G3 नृपः प्रहरणो; M1 (*inf. lin.*) सुराग्रहणो; Ca.d.s as in text. — b) B4 D6.7 आत्मवान्; D3.4 स्वार्थवान्; Ca अर्थवान्; Cs अर्थवान् (as in text). K3 कीनाशश्चार्थहा तथा. — c)

तृणोल्कया ज्ञायते जातरूपं
युगे भद्रो व्यवहारेण साधुः ।
शूरो भयेष्वर्थकृच्छ्रेषु धीरः
कृच्छ्रास्वापत्सु सुहृदश्चारयश्च ॥ ४२
जरा रूपं हरति हि धैर्यमाशा
मृत्युः प्राणान्धर्मचर्यामसूया ।
क्रोधः श्रियं शीलमनार्यसेवा
ह्रियं कामः सर्वमेवाभिमानः ॥ ४३
श्रीर्मङ्गलात्प्रभवति प्रागल्भ्यात्संप्रवर्धते ।
दाक्ष्यात्तु कुरुते मूलं संयमात्प्रतितिष्ठति ॥ ४४
अष्टौ गुणाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च ॥ ४५
एतान्गुणांस्तात महानुभावा-
नेको गुणः संश्रयते प्रसह्य ।
राजा यदा सत्कुरुते मनुष्यं
सर्वान्गुणानेष गुणोऽतिभाति ॥ ४६
अष्टौ नृपेमानि मनुष्यलोके
स्वर्गस्य लोकस्य निदर्शनानि ।
चत्वार्येषामन्ववेतानि सद्भि-
श्चत्वार्येषामन्ववयन्ति सन्तः ॥ ४७
यज्ञो दानमध्ययनं तपश्च
चत्वार्येतान्यन्ववेतानि सद्भिः । C. 5. 1235 B. 5. 35. 55 K. 5. 35. 67

D1 रक्षाम्सुकरः; D7 रक्षेत्सुके. — d) K2.4 B Dn D2 D1.5-7.10 T2 G1-3 प्रज्ञावद्भिः; D3 °इना: (for °हुणैः).

42 b) K4 D3 D8 T1 G2-5 युगेन; K3 B Dn D5-6.10 T2 युगेन; G2 योगे; Cd धूर्युगे; Ca.s युगे (as in text). D9 धुर्यो; G शुद्रो; Ca.d.s भद्रो (as in text). K1 व्यवहारेपि; D1.2 व्यवहारे च; D2.4.7 G3 M व्यवहारेषु; Ca व्यवहारेण (as in text). Cd.s cite व्यवहारे. K1 असाधुः. — c) D2.3 अथ कृच्छ्रेषु; Cs as in text. — d) K1 Dn1 D3 D7.8.10 M1.3.4 कृच्छ्रास्वापत्सु; B कृच्छ्रेस्वापत्सु (so mostly old printed ed.!).

43 a) K1.2.3 D2.9 हरते. K (K3 missing) Dn2 D1.2.3.5 om. हि. D8 m.10 आशां; Cs आशा (as in text). — d) K2 B1 S (except T2 G3) अति° (for अभि°); cf. v. l. 5. 37. 7. — After 43, S (except T2) ins.:

211* न क्रोधिनोऽर्थो न नृशंसस्य मित्रं
क्रूरस्य न स्त्री सुखिनो न विद्या ।
न कामिनो ह्रीरलसस्य कोशः
सर्वं तु न स्यादनवस्थितस्य ।

[(L. 3) T1 G4 न स्त्री; G2 दाक्ष्याद्; G3 च श्रीः; G5 न श्रीः (for कोशः).]

44 a) D1 श्रीर्धैर्यात्; M1.3.4 मंगल्यात्; Ca as in text. — b) D1 G5 संप्रवर्तते; G3 संविवर्धते (for संप्र°). — c) K1 Dn1 D8 प्र-; K2.3 च; T1 G1.2 M1 (inf. lin.) स्वं; G3 M सं- (for तु). S (except T2; G4 damaged) रूपं (for मूलं). — d) B4 संश्रयात्; Ca.d.s संयमात् (as in text). K2 D5 D10 °तिष्ठते.

45 K1 D1 om. 45. — a) K3 (m as in text) D7 प्रीणयंति; Cd दीपयन्ति (as in text). — b) K3 कुलं चैव (for च कौल्यं च). T1 G2.4 M कौशी; Ca.d कौल्यं (as in text). G4 शमः (for श्रुतं). — Cf. v. l. 5. 33. 76, 80; 37. 28 for this and the foll. stanza.

46 Cf. v. l. 45. — a) G5 तांश्च (for तात). S (except T2 G2) महानुभाव; Cd °भावान् (as in text). G2-5 M (except M2) प्रगृह्य; Cd.s प्रसह्य (as in text). — c) D5.6 संश्रयते (for सत्कुरुते). G3 M1 मनुष्यान्. — d) D2.4.7.9 एक-; Cd.s एषः (as in text). K1 अतियाति; K3.4 B3 D2.4 (by corr.).5-7 T Cn विभाति; B1 Dn D8 G1 अभिभाति; D8.10 बिभर्ति; Ca अतिभाति (as in text).

47 T1 (hapl.) om. 47d-48b. — d) K3 B1.4 Dn1 D5-7 T2 G3 चैषाम्; B3 Dn2 तेषाम्; D1 तैषाम् (for एषाम्). K3 B4 Dn D5.7 T2 अनुयांति; D1 अन्ववसंति; G2.4 M °वायंति; G5 °धायंति; Ca.s °वयंति (as in text); cf. v. l. 48.

48 K4 D1 G5 om. 48; T1 om. 48ab (cf. v. l. 47). — b) K3 अन्ववयंति; Cs °वेतानि (as in text). K3 om. 48cd. — c) D2 transp. दमः and सत्यं and adds च. B1 D2.4 धर्मः (for दमः). — d) B2.4 Dn D2-8 T2 अनुयांति; D8 अन्ववेतानि; T1 G2.4 M °वायंति; G3 °वसंति (for °वयन्ति); cf. v. l. 47. — After 48, N (except B1 D2; K3 missing) T G1.3 ins.:

212* इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ।

C. 5. 1209
B. 5. 35. 56
K. 5. 35. 57

दमः सत्यमार्जवमानृशंस्यं
चत्वार्येतान्यन्ववयन्ति सन्तः ॥ ४८
न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥ ४९
सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनम् ।
शौर्यं च चित्रभाष्यं च दश संसर्गयोनयः ॥ ५०
पापं कुर्वन्पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन्पुण्यकीर्तिः पुण्यमेवाश्नुते फलम् ॥ ५१
पापं प्रज्ञां नाशयति क्रियमाणं पुनः पुनः ।
नष्टप्रज्ञः पापमेव नित्यमारभते नरः ॥ ५२
पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः ।
वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः ॥ ५३
असूयको दन्दशूको निष्ठुरो वैरकृन्नरः ।
स कृच्छ्रं महदाप्नोति नचिरात्पापमाचरन् ॥ ५४
अनसूयः कृतप्रज्ञः शोभनान्याचरन्सदा ।
अकृच्छ्रात्सुखमाप्नोति सर्वत्र च विराजते ॥ ५५

[=(var.) 3. 2. 71; =(var.) Hitopades'a 1. 7. — (L. 1) D5 transp. क्षमा and घृणा. D2 T1 G1 दमः; D8.4 दया (for घृणा). — (L. 2) K1.2.4 D2-6.8 T1 G1 धर्मेश्च (for धर्मेस्र).]

— K (K3 missing) D (except D5 D8.10) T G1.3 cont.: G4 ins. after 48:

213* तत्र पूर्वचतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो नामहात्मसु तिष्ठति ।

[=(var.) Hitopades'a 1. 8. — (L. 1) Cf. 3. 2. 72[ab]. D8 T2 यत्र (for तत्र). Dn पूर्व (for पूर्व-). T1 G1 धर्मार्थे; C8 दम्भार्थं (as in text). T1 G1.4 क्षम्यते (for सेव्यते). — (L. 2) K4 D5 D2 G3 च (for तु).]

49 =(var.) Hitopades'a 3. 59; =(var.) Śārṅgadharapaddhati 1344. — [b]) K4 D5 D8.4 transp. न ते and वृद्धा. B4 D7 विदंति (for वदन्ति). K2 धर्मान् (for धर्मं). — [d]) D5 transp. न तत् and सत्यं. G4 नैतत् (for न तत्). N (except K2.4 D2; K3 missing) अभ्युपेतं (Dn2 °पैति) (for अनुविद्धम्).

50 [a]) Dn1 व्रतं; C8 श्रुतं (as in text). — [b]) Dn1 D3.4.9 S (except G3; G4 damaged) कुलं; Ca.d कौल्यं (as in text). — [c]) D1 चरित्र°; G1-3 M विचित्र° (for च चित्र°). K2 प्रीति°; D2 G3 मित्र°; D8.9 मित्र°; Ca.d.8 चित्र° (as in text). K3 शौर्यं च प्रीतिसंभाष्यं. — [d]) K1.3 Cnp दश संसर्गजा गुणाः; K4 B Dn D5 D1-7.10 m T2 दशेमे (Dn1 D7 दशैते; D1 दश वै) स्वर्गयोनयः. C8 cites संसर्गयोनयः (as in text), Cd.8 cite संसर्गस्य योनयः. — After 50, M ins.:

214* अथ यो नैव विब्रूयात्र सत्यं नानृतं वदेत् ।
ये धर्ममभ्यसूयन्तस्तूष्णीं ध्यायन्त आसते ।
श्रेष्ठः पादं हरेत्तत्र भवेत्पादश्च कर्तरि ।
पादश्चैव सभासत्सु यत्र निन्द्यो न निन्द्यते ।
अनेनाः श्रेष्ठो भवति प्रमुच्यन्ते सभासदः ।
एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ।
[Cf. 209*.]

51 [d]) K2 B D (except D3.4.9) T2 पुण्यमत्यंतमश्नुते (K3 °मेधते). — After 51, K4 B (except B1) D (except D1) T2 ins.:

215* तस्मात्पापं न कुर्वीत पुरुषः शंसितव्रतः ।

संप्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयसे राजन्न चाप्यापद्गता वयम् ॥ २५
अकस्माद्द्विषसे राजञ्जन्मप्रभृति पाण्डवान् ।
प्रियानुवर्तिनो भ्रातॄन्सर्वैः समुदितान्गुणैः ॥ २६
अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते ।
धर्मे स्थिताः पाण्डवेयाः कस्तान्किं वक्तुमर्हति ॥ २७
यस्तान्द्वेष्टि स मां द्वेष्टि यस्ताननु स मामनु ।
ऐकात्म्यं मां गतं विद्धि पाण्डवैर्धर्मचारिभिः ॥ २८
कामक्रोधानुवर्ती हि यो मोहाद्विरुरुत्सते ।
गुणवन्तं च यो द्वेष्टि तमाहुः पुरुषाधमम् ॥ २९
यः कल्याणगुणाञ्ज्ञातीन्मोहाल्लोभाद्दिदृक्षते ।
सोऽजितात्माजितक्रोधो न चिरं तिष्ठति श्रियम् ॥ ३०
अथ यो गुणसंपन्नान्हृदयस्याप्रियानपि ।
प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ॥ ३१
सर्वमेतदभोक्तव्यमन्नं दुष्टाभिसंहितम् ।
क्षत्तुरेकस्य भोक्तव्यमिति मे धीयते मतिः ॥ ३२
एवमुक्त्वा महाबाहुर्दुर्योधनममर्षणम् ।
निश्चक्राम ततः शुभ्राद्धार्तराष्ट्रनिवेशनात् ॥ ३३
निर्याय च महाबाहुर्वासुदेवो महामनाः । C. 5. 3270 B. 5. 91. 34 K. 5. 91. 35

विग्रहः. — K5 om. 22^c–23^b. — ^d) K1.4 B1.3.4 D2–4.8.9 T1 G1.3 अर्हसि.

23 B4 om. 23–25; K5 om. 23^ab (cf. v.l. 22). Before 23, K2 Dn2 Ds.4.9 ins. वैशं° उ°.

24 =(var.) 5. 49. 15. Cf. 5. 81. 34; 178. 11. — B4 om. 24 (cf. v.l. 23). Before 24, K1.3 Ds.4.9 G2.3 ins. भगवानुवाच (K3 G2.3 [om. उ°] with prefixed श्री). — ^a) S नाहंकारान्न (for नाहं कामान्न). Cs. d.3 cite कामात्. — ^b) S क्रोधात्; Cs द्वेषात् (as in text). — ^c) D2 बुद्धिमोहात्; Cs हेतु° (as in text). Cs लाभात्; Cs.ap as in text. — After 23, K5 D10 ins.:

408* पूजां कृतां प्रीयमाणो को विद्वांस्त्यक्तुमर्हति ।

25 B4 om. 25 (cf. v.l. 23). — ^a) K5 D2–4.9 प्रीतिभोज्या(D3 °तोष्या)नि चान्नानि; M4 संप्रीय भोज्यान्यन्नानि. — ^b) D5 D1 T1 G1 ह्यापद्भो°; G4 चापद्भो°. — ^c) K3 च: प्रीयसे; Ds.8.8 त्वं प्रीयसे (for संप्री°). K5 नास्माभिः प्रीयसे राजन्. — ^d) K4.5 न वा; G3 नैव (for न च). K1 B D (except Ds.4) एव; T1 हि (for अपि). — After 25, K5 (om. line 1) G2.3 ins. 409*.

26 Ds.4.8 om. 26. — ^a) K1.4.5 B1.3.4 Dn Ds Ds.5.7–10 द्वेक्षि वै; K3 B2.3 D1 Cs द्वेक्षि वै (for द्विषसे). — ^d) =5. 88. 92^b.

27 ^c) S (except G3) स्थितान् °वेयान्. — ^d) K1.3 त(K3 क)स्मात्किं वक्तुमर्हसि; T1 G1 कस्माद्विद्वेष्टुमर्हति; T2 G3 न कस्माद्द्वेष्टुमर्हसि; G2.3 कस्मात्त्वं द्वेष्टुमिच्छसि.

28 ^ab) =(var.) 3. 13. 38^cd. — ^c) D3 एकत्वं; G1 ऐकार्थ्यं (for ऐकात्म्यं). K5 एकात्मानं; Ds.8 एकात्मतां; T2 (after corr.) एकार्थत्वं (for ऐकात्म्यं मां). K1.3 D1.2 G1.3 आगतं (for मां गतं). T2 (before corr.) ऐकात्म्यमागतं विद्धि.

29 ^b) K4.5 B (except B3) Dn Ds Ds–10 Cs.d वि(Ds.8 हि)रुरुत्सति; T2 G3.4.5 विचिकित्सते. D2 यो मोहाद्वर्तते भृशं.

30 ^a) K5 ज्ञात्वा; T2 G3 हित्वा; G3–5 M जानन् (for ज्ञातीन्). T1 G1 यः कल्याणमजानन्वै. — ^b) K1.2.3 द्वेषात्; Ds.4.9 S रोषात् (for मोहात्). K1 B3 Ds D1.10 नोत; K3 वात; K5 नाति; D3 नैतत्; Ds.4.9 नैव; S एव (for लोभाद्). — ^c) S om. (the initial) सः. — ^d) =(var.) 4. 4. 32^d. K3 D1 श्रिये; K4 D2 T1 G2.3.5 M श्रिया; B Ds Ds.9 G1 श्रियां; D3 G4 श्रियः (for श्रियम्).

31 K5 om. 31. — ^b) K3 D3 T2 G4.5 प्रियान् (for अप्रियान्). — K4 Ds.6.8 T G1.2.4 ins. after 31: K5 (om. line 1) G2.3, after 25: Dn1, after 32: Ds, after 32^ab:

409* द्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत् ।
पाण्डवान्द्विषसे राजन्मम प्राणा हि पाण्डवाः ।

32 ^a) B D (except D1–4.7.9) G4 न भोक्तव्यं (for अभो°). — ^b) K1 D3 °भिसंधितं. — Ds ins. 409* after 32^ab. — ^d) D7.10 निश्चिता (for धीयते). G2.3 M (except M1) मन: (for मतिः). — Dn1 ins. 409* after 32.

33 G3 om. 33–34; D3 om. 33^ab. Before 33, K4 T2 G2.4.5 ins. वैशं° उ° (resp. वैशं°). — ^a) T2

C. 5. 3270 B. 5. 91. 34 K. 5. 91. 36 निवेशाय ययौ वेश्म विदुरस्य महात्मनः ॥ ३४

तमभ्यगच्छद्द्रोणश्च कृपो भीष्मोऽथ बाह्लिकः ।
कुरवश्च महाबाहुं विदुरस्य गृहे स्थितम् ॥ ३५

तेऽभिगम्याब्रुवंस्तत्र कुरवो मधुसूदनम् ।
निवेदयामो वार्ष्णेय सरत्नांस्ते गृहान्वयम् ॥ ३६

तानुवाच महातेजाः कौरवान्मधुसूदनः ।
सर्वे भवन्तो गच्छन्तु सर्वा मेऽपचितिः कृता ॥ ३७

यातेषु कुरुषु क्षत्ता दाशार्हमपराजितम् ।
अभ्यर्चयामास तदा सर्वकामैः प्रयत्नवान् ॥ ३८

ततः क्षत्तान्नपानानि शुचीनि गुणवन्ति च ।
उपाहरदनेकानि केशवाय महात्मने ॥ ३९

तैस्तर्पयित्वा प्रथमं ब्राह्मणान्मधुसूदनः ।
वेदविद्भ्यो ददौ कृष्णः परमद्रविणान्यपि ॥ ४०

ततोऽनुयायिभिः सार्धं मरुद्भिरिव वासवः ।
विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च ॥ ४१

इति श्रीमहाभारते उद्योगपर्वणि एकोननवतितमोऽध्यायः ॥ ८९ ॥

(*inf. lin.*, as in text) G_3 कृष्णो (for शुश्राव्).

34 G_3 om. 34 (cf. v.l. 33); G_4 om. 34^{ab}. — ^{a}) D_{n1} $D_{2.3}$ निर्ययौ. — ^{b}) T $G_{1.2.5}$ M_{2-5} निवासाय; $C_{a.d}$ निवे° (as in text).

35 D_1 om. 35^{c}–37^{b}. — ^{ab}) $D_{2.4.9}$ T $G_{1.2.5}$ समन्व° (for समभ्य°). K_3 transp. द्रोणः and भीष्मः. K_3 B_3 T_2 G_4 च (for अथ). — ^{d}) $K_{1.3}$ $G_{2.5}$ M गृहेऽतिथिं; T G_1 गृहातिथिं; G_4 अतिथिं प्रियं (for गृहे स्थितम्).

36 D_1 om. 36 (cf. v.l. 35). — ^{a}) S (except G_1) अनु° (for अभि°). D_{10} सर्वे (for तत्र). B D_n D_3 $D_{2.3}$ त ऊचुर्माधवं वीरं. — K_3 om. 36^{c}–37^{b}. — ^{c}) $K_{1.3}$ $B_{3.4}$ D_{n1} D_3 $D_{2.4.6.8}$ निवेदयाम. — ^{d}) K_1 $D_{2.4.9}$ स्व°; D_3 च; D_7 वै (for ते). K_3 transp. गृहान् and वयं. $D_{2.4.9}$ सरत्नं च गृहं वयं.

37 K_4 D_1 om. 37^{ab} (cf. v.l. 35, 36). — ^{a}) S °बाहुः (for °तेजाः). — ^{b}) $G_{2.3}$ पार्थिवान् (for कौर°). — ^{d}) K_3 स्वानि वेश्मानि भूमिपाः. — After 37, T_2 G_3 ins.:

410* न प्रीतिरस्मत्पूजा वो भवतां कुरुसत्तमाः ।
दुर्योधनश्च युष्मासु न च प्रीतिं करिष्यति ।
त एवमुक्ताः कृष्णेन एवमस्त्विति निर्ययुः ।

38 K_3 om. 38. — ^{a}) $D_{1.3}$ गते° (for याते°). T_1 G_1 यातेषु तेषु क्षत्ता तु. — ^{d}) T G M_1 (*inf. lin.*) उपस्थितैः ($G_{2.3}$ °तं; M_1 °तः) (for प्रयत्नवान्).

39 ^{a}) T_1 G_1 तत्र; T_2 $G_{2.3.5}$ M (except M_1) अथ (for ततः). — ^{b}) = 41^{d}. K_3 गुणवंति च केशवं. — ^{c}) S अमेयानि (for अनेकानि).

40 ^{c}) $G_{2.4}$ M अददात् (for ददौ). — ^{d}) K_3 D_{n1} प्रथमं (for परम°). — After 40, K_4 S (G_3 om. hapl. from the posterior half of line 1 up to 41^{a}) ins.:

411* भुक्तवत्सु द्विजेन्द्रेषु निषण्णस्य वरासने ।
शुचिः सुप्रयतो भूत्वा विदुरोऽन्नमुपाहरत् ।
श्रद्धया परया युक्त इदं वचनमब्रवीत् ।
संभ्रमैस्तुष्य गोविन्द एतच्च परमं धनम् ।
अन्यथा वा विशेषेण कस्त्वामर्चितुमर्हति ।
[(L. 1) T_1 G (except G_3) द्विजाग्र्येषु (for द्विजे°). T $G_{1.2.4}$ निषण्णेषु. T_2 G_3 आसनेषु च (for वरा°). — (L. 3) T_1 G_1 विदुरः श्रद्धया युक्तः (for the prior half).]

— T_2 (marg. *sec. m.*) cont.:

412* उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं नारी निःस्पृहस्य तृणं जगत् ।

41 G_3 om. 41^{a} (cf. v.l. 40). — ^{b}) S निषण्णः परमासने. — ^{d}) = 39^{b}. — After 40, K_4 S ins.:

413* तं भुक्तवन्तं विविधाः सुवाग्दाः सूतमागधाः ।
अभितुष्टुवुरासीनं दाशार्हमपराजितम् ।
[(L. 1) T_1 G_1 गोविंदं (for विविधाः).]

Colophon missing in K_3. — *Sub-parvan:* $K_{1.2.4.5}$ B D_n D_3 $D_{1.2.5-8.10}$ T_1 G_1 M भगवद्यान. — *Adhy. name:* T_1 विदुरगृहे कृष्णभोजनं; G_1 विदुरगृहप्रवेशनं; G_3 विदुरगृहभोजनं; $M_{1.4}$ विदुरमाहात्म्यप्रतिपादनं; M_3 विदुरमाहात्म्यं. — *Adhy. no.* (figures, words or both): D_3 89; D_3 87; D_7 $M_{2-3.5}$ 92; T $G_{2.4.5}$ 93; G_1 94; G_3 M_4 91. — *S'loka no.:* K_3 72; D_n 43; D_3 44.

९०

वैशंपायन उवाच ।

तं भुक्तवन्तमाश्वस्तं निशायां विदुरोऽब्रवीत् ।
नेदं सम्यग्व्यवसितं केशवागमनं तव ॥ १
अर्थधर्मातिगो मूढः संरम्भी च जनार्दन ।
मानघ्नो मानकामश्च वृद्धानां शासनातिगः ॥ २
धर्मशास्त्रातिगो मन्दो दुरात्मा प्रग्रहं गतः ।
अनेयः श्रेयसां पापो धार्तराष्ट्रो जनार्दन ॥ ३
कामात्मा प्राज्ञमानी च मित्रध्रुक्सर्वशङ्कितः ।
अकर्ता चाकृतज्ञश्च त्यक्तधर्मः प्रियानृतः ॥ ४
एतैश्चान्यैश्च बहुभिर्दोषैरेष समन्वितः ।
त्वयोच्यमानः श्रेयोऽपि संरम्भान्न ग्रहीष्यति ॥ ५
सेनासमुदयं दृष्ट्वा पार्थिवं मधुसूदन ।
कृतार्थं मन्यते बाल आत्मानमविचक्षणः ॥ ६
एकः कर्णः पराञ्जेतुं समर्थ इति निश्चितम् ।
धार्तराष्ट्रस्य दुर्बुद्धेः स शमं नोपयास्यति ॥ ७
भीष्मे द्रोणे कृपे कर्णे द्रोणपुत्रे जयद्रथे ।
भूयसीं वर्तते वृत्तिं न शमे कुरुते मनः ॥ ८
निश्चितं धार्तराष्ट्राणां सकर्णानां जनार्दन । C. 5 3285 B. 5. 92. 8 K. 5. 92. 8

90

☞ This adhy. is missing in K2 (cf. v.l. 5. 32. 15).

1 a) T1 आश्वास्य; M3-5 आसीनं (for आश्वस्तं). — b) D4.6.8 निशीथे (for °शायां). — After 1ab, K4 ins. a passage given in App. I (No. 4), and om. from 1c to the end of stanza 21 of the next adhy. — c) S transp. सम्यक् and व्यवसितं. — d) D7.10 यदत्र (for केशव).

2 K4 om. 2 (cf. v.l. 1). — a) K3 B Dn Ds1 D10 मंदः (for मूढः). Ds2 D7 अथ धर्मातिगो मंदः; D4.6.8 अनुधर्मातिगोविदः (D8 °गो मूढः); G4 अर्थातिगश्च मूढश्च; Ca.d.s as in text. — T2 reads 2c–3d after 7.

3 K4 om. 3 (cf. v.l. 1). — For T2, cf. v.l. 2. — a) D2 सर्व° (for धर्म°). K1 मर्त्यः; K3.4 B D G3 मूढः (B3 मत्तः); T1 G1 मूर्खः (for मन्दः). — b) B2 प्रकृतिं; D1 दुर्मदं; Ca.d.s प्रग्रहं (as in text). — c) K1 D1 G5 अनयः; Ca.d as in text. B2 Dn1 D8 श्रेयसा; Ca.d as in text. K4 B D (except D3-4.9) मंदो (for पापो).

4 K4 om. 4 (cf. v.l. 1). — b) K4 B3.4 Dn2 Ds1 D6.8.10 Cn °शंकिता; G4 °वंचकः (for °शङ्कितः). — c) Ds2 अकृतात्माकृतज्ञश्च. — d) K3.4 B Dn Ds D5-7.9.10 G4 त्यक्तधर्मा (Ds2 अन्यधर्मः) (for त्यक्त°). B3 [अ]नृतप्रियः. — After 4, N (K2 missing; K4 om.) ins.:

414* मूढश्चाकृतबुद्धिश्च इन्द्रियाणामनीश्वरः ।
कामानुसारी कृत्येषु सर्वेष्वकृतनिश्चयः ।

[(L. 1) K1.3 D1.8 मूढश्च प्राज्ञमानी च; Dn1 मूढश्च पापमानी च; D7 मूढः प्रज्ञानमानी च (for the prior half). D8 क्षत्रियाणाम् (for इन्द्रियाणाम्). — (L. 2) D1 कामानुचारी क्षत्ते च (for the prior half). D1 सत्येषु (for सर्वेषु). K1 Ds1 D2 कृतनिश्रमः; D1.5.8 कृतनिश्चयः; Ca अकृतनिश्रमः (for अकृत°). Cd cites निःश्रमः.]

5 K4 om. 5 (cf. v.l. 1). — a) K1 transp. दोषैः and एष. B3.4 Dn2 D1.2.5.6-9 M3 एव; G4 एवं (for एष). — c) S °मानं (for °मानः). — d) S करि° (for ग्रही°).

6 K4 om. 6 (cf. v.l. 1); D1 om. 6–7. Dn2 D8 D5.8.10 read 6–7 after 9. — a) D3-4.8 सेनासमुच्चयं; Ca as in text. K4 Dn श्रुत्वा (for दृष्ट्वा). — d) K3 चाविचक्षणः; D4.6.9 च विचक्षणः; G3 अपराजितं (for अविचक्षणः).

7 K4 D1 om. 7 (cf. v.l. 1, 6). For transp. in Dn2 D8 D5.8.10 cf. v.l. 6. — ab) K1.3 D8 D1.5.8 पराजेतुं (for पराञ्जेतुं). S (except G4 M3) निश्चयः (for निश्चितम्). D4.6.9 उच्यमानोपि पापात्मा न करिष्यति निश्चितं. — c) K2 D4.6.8 धार्तराष्ट्रस्तु (K3 °ष्ट्रः सु°) दुर्बुद्धिः. — d) D4.6.9 M3.4 प्रशमं; D8 शमनं; G2.5 संशमं (for स शमं). T1 G3-5 M1.3-5 उपलप्स्यते (G2.5 °से). G2 °लप्स्यते; M2 °लप्स्यते (for °यास्यति). T1 शमं नैवोपलप्स्यते. — After 7, T2 reads 2c–3d.

8 K4 om. 8 (cf. v.l. 1); D8 om. 8a–9b. — a) Ds1 S (except G3) भूयसीं; C3 भूयसीं (as in text). T2 G1.3.4 वर्धं° (for वृत्तं°). Ds1 T G1.3.4 वृत्तिः; M वृत्तिः; Cs वृत्तिं (as in text). — d) D4.6.9 मतिं (for मनः).

C. 5.3306
B. 5.92.9
K. 5.92.8

भीष्मद्रोणकृपान्पार्था न शक्ताः प्रतिवीक्षितुम् ॥ ९
संविच्च धार्तराष्ट्राणां सर्वेषामेव केशव ।
शमे प्रयतमानस्य तव सौभ्रात्रकाङ्क्षिणः ॥ १०
न पाण्डवानामस्माभिः प्रतिदेयं यथोचितम् ।
इति व्यवसितास्तेषु वचनं स्यान्निरर्थकम् ॥ ११
यत्र सूक्तं दुरुक्तं च समं स्यान्मधुसूदन ।
न तत्र प्रलपेत्प्राज्ञो बधिरेष्विव गायनः ॥ १२
अविजानत्सु मूढेषु निर्मर्यादेषु माधव ।
न त्वं वाक्यं ब्रुवन्युक्तश्चाण्डालेषु द्विजो यथा ॥ १३
सोऽयं बलस्थो मूढश्च न करिष्यति ते वचः ।
तस्मिन्निरर्थकं वाक्यमुक्तं संपत्स्यते तव ॥ १४
तेषां समुपविष्टानां सर्वेषां पापचेतसाम् ।
तव मध्यावतरणं मम कृष्ण न रोचते ॥ १५
दुर्बुद्धीनामशिष्टानां बहूनां पापचेतसाम् ।
प्रतीपं वचनं मध्ये तव कृष्ण न रोचते ॥ १६
अनुपासितवृद्धत्वाच्छ्रिया मोहाच्च दर्पितः ।
वयोदर्पादमर्षाच्च न ते श्रेयो ग्रहीष्यति ॥ १७
बलं बलवदप्यस्य यदि वक्ष्यसि माधव ।
त्वय्यस्य महती शङ्का न करिष्यति ते वचः ॥ १८
नेदमद्य युधा शक्यमिन्द्रेणापि सहामरैः ।
इति व्यवसिताः सर्वे धार्तराष्ट्रा जनार्दन ॥ १९
तेष्वेवमुपपन्नेषु कामक्रोधानुवर्तिषु ।

---

9 K5 om. 9 (cf. v.l. 1); D8 om. 9^{ab} (cf. v.l. 8). — ^{a}) T1 G1 च केशव (for जना°). — ^{c}) K4 B Dn D3 D4.6.8 T1 G1 °सुतान् (for °कृपान्). — ^{d}) T2 G1.3.4 M3-5 transp. न and शक्ताः. — After 9, Dn3 D5 D8.9.10 read 6–7.

10 K5 om. 10 (cf. v.l. 1). — ^{a}) D2 संधिश्च; D3.4.9 सुताना; D5.6.8 संधिं च; S निश्चितं (for संविच्च). Ca.d.s cite संविद्. — ^{b}) D2 इति केशव; D3.4.9 मधुसूदन (for एव केशव). — 10^{cd} = (var.) 5. 93. 16^{cd}. — ^{d}) D5 यत्नसौभ्रात्र°; S तव शासनकाङ्क्षिणां (T1 G1.2.3 °कांक्षणं).

11 K5 om. 11 (cf. v.l. 1). — ^{c}) M3-5 यदि (for इति). D1 व्यवसितस्य; D2 S °सितं; Cs as in text.

12 K5 om. 12 (cf. v.l. 1); K4 om. 12^{a}–14^{b}. — ^{a}) S वा (for च). — ^{d}) K3 Dn1 T2 G3 गायनं; D5 (*sup. lin.* as in text) T1 G2.3 M (except M1) गायकः (for °नः).

13 K4.5 om. 13 (cf. v.l. 12, 1). — ^{a}) K3 अविज्ञातेषु; B3 D3 °ज्ञानेषु; G4 M2.3 अपि जानत्सु; Cs as in text. — ^{b}) S केशव (for माधव). — ^{c}) K3 न ते; S (except G1.3) तत्त्वं (T2 m तव) (for न त्वं). K1 D5 ब्रुवन्सूक्तं; K2 ब्रुवं युक्तं; D3.4.9 क्षमो वक्तुं; S (except T1 G1.3 M3) ब्रुवन्युक्तं. — ^{d}) K1 B4 D1.6 S चंडालेषु.

14 K4 om. 14^{ab}; K5 om. 14 (cf. v.l. 12, 1). — K4 reads 14^{cd} after 415*. — ^{c}) D5 तस्मात् (for तस्मिन्). — ^{d}) S संपद्यते (for °त्स्यते). D5 D8 ततः (for तव).

15 K5 om. 15 (cf. v.l. 1); D5 om. (hapl.) 15^{c}–16^{b}. — ^{c}) D1 तव मध्येवतरणं.

16 K5 G3 (hapl.) om. 16 (cf. v.l. 1); D2 om. 16^{ab} (cf. v.l. 15). — ^{a}) T G1.3.4 अबुद्धीनाम् (for दुर्बु°). — ^{b}) K4 B D (except D1.7.10; D5 om.) दुष्टचेतसाम्; G3 °कारिणां (for पाप°). — ^{c}) D5 D6.8.8 S (G3 om.) प्रतीप-; Ca.d प्रतीपं (as in text). G3 कृष्ण; M1.3 (*inf. lin.* as in text) तात (for मध्ये). — ^{d}) G4 तस्मै मध्ये (for तव कृष्ण). B D5 D1.3-7.10 M1 (*inf. lin.*) रोचये (for °ते).

17 K5 om. 17 (cf. v.l. 1). — ^{b}) K3 B4 D2.7.10 श्रियः (for श्रिया). K4 B D (except D3.4.7.9) दर्पाच्च (D1 °त्त्व-) मोहितः; S मोहेन दर्पितः (T1 G1 गर्वितः) (for मोहाच्च द°). — ^{c}) T G (except G3) वचो- (for वयो-). T2 G3 -गर्वात् (for -दर्पात्). K3 असमर्षाच्च; D3.4.9 अयमर्षाच्च. — ^{d}) K3 तात (for न ते). G3.4 भविष्यति; G4 M ग्रहीष्यते.

18 K5 om. 18 (cf. v.l. 1). — ^{a}) K3 D3.8m हितं; S वचः; Ca.d.s बलं (as in text). — After 18, K4 ins.:

415* मानी मौर्ख्येण पार्थानां न पश्यत्यधिकं बलम् ।,
followed by 14^{cd}.

19 K5 om. 19 (cf. v.l. 1). — ^{a}) T G1.3.4 M1.3.4 (*inf. lin.*) अस्य (for अद्य). D2 वदेम यथाथा शक्यं. — ^{d}) D1 जनेश्वर (for जना°).

20 K5 om. 20 (cf. v.l. 1). — ^{b}) K3 D3.4.9 S °क्रोधानुसारिषु.

समर्थमपि ते वाक्यमसमर्थं भविष्यति ॥ २०
मध्ये तिष्ठन्हस्त्यनीकस्य मन्दो
रथाश्वयुक्तस्य बलस्य मूढः ।
दुर्योधनो मन्यते वीतमन्युः
कृत्स्ना मयेयं पृथिवी जितेति ॥ २१
आशंसते धृतराष्ट्रस्य पुत्रो
महाराज्यमसपत्नं पृथिव्याम् ।
तस्मिञ्शमः केवलो नोपलभ्यो
बद्धं सन्तमागतं मन्यतेऽर्थम् ॥ २२
पर्यस्तेयं पृथिवी कालपक्वा
दुर्योधनार्थे पाण्डवान्योद्धुकामाः ।
समागताः सर्वयोधाः पृथिव्यां
राजानश्च क्षितिपालैः समेताः ॥ २३
सर्वे चैते कृतवैराः पुरस्ता-
त्त्वया राजानो हृतसाराश्च कृष्ण ।
तवोद्वेगात्संश्रिता धार्तराष्ट्रा-
न्सुसंहताः सह कर्णेन वीराः ॥ २४
त्यक्तात्मानः सह दुर्योधनेन
सृष्टा योद्धुं पाण्डवान्सर्वयोधाः ।
तेषां मध्ये प्रविशेथा यदि त्वं
न तन्मतं मम दाशार्ह वीर ॥ २५
तेषां समुपविष्टानां बहूनां दुष्टचेतसाम् ।
कथं मध्यं प्रपद्येथाः शत्रूणां शत्रुकर्शन ॥ २६
सर्वथा त्वं महाबाहो देवैरपि दुरुत्सहः ।
प्रभावं पौरुषं बुद्धिं जानामि तव शत्रुहन् ॥ २७
या मे प्रीतिः पाण्डवेषु भूयः सा त्वयि माधव ।
प्रेम्णा च बहुमानाच्च सौहृदाच्च ब्रवीम्यहम् ॥ २८ C. 5. 3306 B. 5. 92. 28 K. 5. 92. 29

इति श्रीमहाभारते उद्योगपर्वणि नवतितमोऽध्यायः ॥ ९० ॥

21 K_2 om. 21 (cf. v.l. 1). — [ab]) S हस्तियूथस्य (for हस्त्य°). K_2 transp. मंदः and मूढः. — [c]) K_3 T_1 G_1 जातमन्युः; K_4 B Dn $D_{8.6.10}$ वीतभीतिः; Ca. d. s वीतमन्युः (as in text). — [d]) B_8 D_8 G (except G_1) मम (for मया). K_1 विजिता महीति (for पृथिवी जितेति).

22 K_2 om. 22 (cf. v.l. 1). — [a]) K_4 B D (except $D_{1.2.6}$) ins. हि after आशंसते. K_1 °ष्ट्रः सपुत्रो (for °ष्ट्रस्य पुत्रो). — [b]) G_1 महद्राज्यम्; $M_{1.2}$ माहाराज्यम् (for महाराज्यम्). T_1 G_1 पृथिव्याः. — 22^{cd} = (var.) 5. 26. 19^{cd}. — [c]) K_2 G_8 अस्मिन् (for तस्मिन्). D_5 C_3 क्षमः; Ca. d क्षेमः (for शमः). $D_{1.4}$ केवले; S (except $M_{2.6}$) °लं; Ca. d. s °लो (as in text). — [d]) K_1 लब्धः सर्वा; D_7 लब्धं पुरस्तात्; $G_{2.5}$ यथासंतं (for बद्धं सन्तं). K_2 बद्धं स ह्यागतं मन्यतेर्थं; K_3 B Dn D_8 $D_{1.2.6.8.10}$ Ca. d. s बद्धं संतं मन्यते ($D_{6.2}$ लभ्यते) लब्धमर्थं; $D_{2.4.9}$ पृथ्वीमिमां मन्यते वश्यगां च; T $G_{1.3}$ यथासंतं मन्यते प्राप्तमर्थं.

23 K_2 om. 23 (cf. v.l. 1). — [c]) G_1 M_{2-6} सर्वयौधाः. K_2 D_{32} पृथिव्या. — [d]) $K_{1.3}$ क्षितिपा वै; D_7 $Ca._9$ क्षितिपालाः; T G $M_{1.2}$ भूमिपालाः (G_2 °लान्); M_{2-6} ये भूमिपालाः (for क्षितिपालैः). Cd cites क्षितिपाः.

24 K_2 om. 24 (cf. v.l. 1). — [a]) D_7 सम° (for पुर°). — [b]) D_7 राजानो वै (for त्वया राजानो). $K_{1.2.4}$ $D_{2.4.7.9}$ °रत्नाः; T $G_{1.3}$ °राज्याः; G_6 M °वैराः; Ca °साराः (as in text). — [d]) K_3 D_2 T $G_{2.4}$ $M_{1.4.5}$ Ca. d सुसंहिताः; B D_4 °हृताः; G_1 °श्रिताः; G_6 °हितान्; G_3 °श्रिताः (for °हताः). Cs cites संहताः. S चैव (for वीराः).

25 K_2 om. 25 (cf. v.l. 1). — [a]) $D_{2.6.8}$ युक्ता°; Ca. d त्यक्ता° (as in text). — [b]) K_4 B D_{n2} D_8 D (except $D_{2.4.9}$) G_8 हृष्टा; Ca. d. s सृष्टा (as in text). G_1 $M_{1.2.5}$ °यौधाः (for °योधाः). — After 25^{ab}, S ins.:

416* मृत्युर्जयो वेति कृतैकभावाः
कामात्मानो मन्युवशाविनीताः ।

26 K_2 om. 26 (cf. v.l. 1). — [b]) D_1 पाप° (for दुष्ट°). — [c]) D_{n1} (before corr.) $D_{1.3.9}$ मध्ये (for मध्यं).

27 K_2 om. 27 (cf. v.l. 1). — [b]) G_8 सुदुःसहः (for दुरु°). — [c]) D_7 प्रभावं बुद्धिशौर्यं च. — [d]) D_7 transp. जानामि and तव.

28 K_2 om. 28 (cf. v.l. 1). — [b]) K_1 D_{n1} $D_{2.4.7.8.10}$ भूयसी (for भूयः सा). — After 28, K_4 B Dn

९१

C. 5. 3308 B. 5. 93. 1 K. 5. 93. 2

भगवानुवाच ।

यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयाद्विचक्षणः ।
यथा वाच्यस्त्वद्विधेन सुहृदा मद्विधः सुहृत् ॥ १
धर्मार्थयुक्तं तथ्यं च यथा त्वय्युपपद्यते ।
तथा वचनमुक्तोऽस्मि त्वयैतत्पितृमातृवत् ॥ २
सत्यं प्राप्तं च युक्तं चाप्येवमेव यथात्थ माम् ।
शृणुष्वागमने हेतुं विदुरावहितो भव ॥ ३
दौरात्म्यं धार्तराष्ट्रस्य क्षत्रियाणां च वैरिताम् ।
सर्वमेतदहं जानन्क्षत्तः प्राप्तोऽद्य कौरवान् ॥ ४
पर्यस्तां पृथिवीं सर्वां साश्वां सरथकुञ्जराम् ।
यो मोचयेन्मृत्युपाशात्प्राप्नुयाद्धर्ममुत्तमम् ॥ ५
धर्मकार्यं यतञ्शक्त्या न चेच्छक्नोति मानवः ।
प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशयः ॥ ६
मनसा चिन्तयन्पापं कर्मणा नाभिरोचयन् ।
न प्राप्नोति फलं तस्य एवं धर्मविदो विदुः ॥ ७
सोऽहं यतिष्ये प्रशमं क्षत्तः कर्तुममायया ।
कुरूणां सृञ्जयानां च संग्रामे विनशिष्यताम् ॥ ८
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।

D5 D8 (marg.), 8-9 ins.:

417* या मे प्रीतिः पुष्कराक्ष त्वद्दर्शनसमुद्भवा ।
सा किमाख्यायते तुभ्यमन्तरात्मासि देहिनाम् ।

[In B4 Dn it is a *repetition*! Cf. v.l. 5. 87. 23.]

Colophon missing in K3; K5 om. it. — *Sub-parvan:* K1.3.4 B Dn D5 D1.2.5-8.10 T1 G1.3 M भगवद्यान. — *Adhy. name:* D1 T1 G1.3 विदुरवाक्यं; M विदुरसंवादे. — *Adhy. no.* (figures, words or both): D3 88; D6 84; D7 M1-3.5 93; T G2.4.5 94; G1 95; G3 M4 92. — *S'loka no.:* Dn D5 30.

91

☞ This adhy. is missing in K2.3 (cf. v.l. 5. 32. 15; 90. 1).

Before 1, K4 D5 S (except G1) ins.:

418* वैशंपायनः ।
विदुरस्य वचः श्रुत्वा प्रश्रितं पुरुषोत्तमः ।
इदं होवाच वचनं भगवान्मधुसूदनः ।

[(L. 1) G3 प्रश्रितः. K4 मधुसूदनः (for पुरुषो°). — (L. 2) D5 T1 G3 प्रोवाच (for होवाच).]

— K4 B3 Dn D1.2.7.10 T G1-3.5 M (except M2) श्रीभगवान्; G4 कृष्णः. — c) D5 T G1.2.5 तथा (for यथा). — d) K4 B D (except D2.4.7.8.10) भवता (for सुहृदा).

2 a) T1 G1 सत्यं (for तथ्यं). — c) D5 यथा (for तथा). — d) D3 यथैव; S श्रावसे (for त्वयैतत्). D2.4.9 पितृवन्मयि; Cn पितृमातृवत् (as in text).

3 ab) K1 पूर्वं; K3 S सर्वं (for सत्यं). G4 ह्रीवं (for युक्तं). K4 B4 D (except Dn1 D1-4.10) G3 M2 वा; G4 मे (for the second च). K1.3 T2 G2.4.5 om. अपि (leaving hiatus!). K1.3 D1.2.5.8.10 एतद् (for एव). T1 G2.3 यदा (for यथा). G4 यदा यथ्यं यदात्थ मां. — c) S शृणु च (for शृणुष्व). — d) S मम (for भव).

4 a) K3 D7 S °राष्ट्राणां. — K4 om. 4c-5b. — c) K1 G3 वैरिणां; B D (except D1) T2 G2 वैरतां. — d) K3 D3 G2 अस्मि (for अद्य).

5 K4 om. 5ab (cf. v.l. 4). — a) S कृत्स्नां (for सर्वां). — b) D2.4.9 सहाश्वरथकुंजरां. — c) K1 अमोचयन्; K3 प्रमो°; D7 G3 यो मोच°. — d) K1.3 D7 प्राप्नुयां. K3 पुण्यम् (for धर्मम्).

6 a) D1 धर्मकार्ये. K1 D7.8 धर्मं कुर्वन्यथाशक्त्या; K3 धर्मकार्ये यतेच्छक्त्या; D5 धर्मकामार्थतां शक्त्या; D2.4.9 धर्मकामो यथाशक्ति; S धर्म(G5 °र्मे)कार्ये यतमानो. — b) B Dn D5 D10 नो (for न). N (except D1-4.9; K2.3 missing) M2 प्राप्नोति (for शक्नोति). — d) K3 T1 तत्र; D2.4.9 इति (for अत्र).

7 a) K3 S (except G4 M2.3) चिंतितं (for चिन्तयन्) — b) K1 उपपादयेत्; K3 (before corr.) उपपद्यते, and (after corr.) उपपादितं; K4 B3.4 Dn3 अतिरोचयन्; Dn3 D2.4 T2 G3 Cs अभिरोचयेत्; D7.10 उपपादयन्; T1 G1 समाचरेत्; G2.5 करोति यः; Cn अभिरोचयन् (as in text). — cd) K1 D7.8 अप्येवं; K4 B Dn D5 D1.2.4.6.10 इत्येवं (avoiding hiatus!); S इति (for एवं).

8 a) K1.3 (sup. lin. sec. m. as in text) D5 G3 प्रणमं; G3 च शमं (for प्रशमं).

9 a) K3 आपद्घोरं (for सेयमापन्). — b) K3 D3

कर्णदुर्योधनकृता सर्वे ह्येते तदन्वयाः ॥ ९
व्यसनैः क्लिश्यमानं हि यो मित्रं नाभिपद्यते ।
अनुनीय यथाशक्ति तं नृशंसं विदुर्बुधाः ॥ १०
आ केशग्रहणान्मित्रमकार्यात्संनिवर्तयन् ।
अवाच्यः कस्यचिद्भवति कृतयत्नो यथाबलम् ॥ ११
तत्समर्थं शुभं वाक्यं धर्मार्थसहितं हितम् ।
धार्तराष्ट्रः सहामात्यो ग्रहीतुं विदुरार्हति ॥ १२
हितं हि धार्तराष्ट्राणां पाण्डवानां तथैव च ।
पृथिव्यां क्षत्रियाणां च यतिष्येऽहममायया ॥ १३
हिते प्रयतमानं मां शङ्केद्दुर्योधनो यदि ।
हृदयस्य च मे प्रीतिरानृण्यं च भविष्यति ॥ १४
ज्ञातीनां हि मिथो भेदे यन्मित्रं नाभिपद्यते ।
सर्वयत्नेन मध्यस्थं न तन्मित्रं विदुर्बुधाः ॥ १५
न मां ब्रूयुरधर्मज्ञा मूढा असुहृदस्तथा ।
शक्तो नावारयत्कृष्णः संरब्धान्कुरुपाण्डवान् ॥ १६
उभयोः साधयन्नर्थमहमागत इत्युत ।
तत्र यत्नमहं कृत्वा गच्छेयं नृष्ववाच्यताम् ॥ १७
मम धर्मार्थयुक्तं हि श्रुत्वा वाक्यमनामयम् ।
न चेदादास्यते बालो दिष्टस्य वशमेष्यति ॥ १८
अहापयन्पाण्डवार्थं यथाव-
च्छमं कुरूणां यदि चाचरेयम् ।
पुण्यं च मे स्याच्चरितं महार्थं
मुच्येरंश्च कुरवो मृत्युपाशात् ॥ १९
अपि वाचं भाषमाणस्य काव्यां
धर्मारामामर्थवतीमहिंस्राम् ।
अवेक्षेरन्धार्तराष्ट्राः समर्थां
मां च प्राप्तं कुरवः पूजयेयुः ॥ २०
न चापि मम पर्याप्ताः सहिताः सर्वपार्थिवाः ।
क्रुद्धस्य प्रमुखे स्थातुं सिंहस्येवेतरे मृगाः ॥ २१
वैशंपायन उवाच ।
इत्येवमुक्त्वा वचनं वृष्णीनामृषभस्तदा ।
शयने सुखसंस्पर्शे शिश्ये यदुसुखावहः ॥ २२ C. 5. 3299 B. 5. 63. 22 K. 5. 93. 23

इति श्रीमहाभारते उद्योगपर्वणि एकनवतितमोऽध्यायः ॥ ९१ ॥

एवं. D3 T1 G1 कुरुष्वेवमुपस्थिता. — ᶜ) D3–4.9 कर्णदुर्योधनकृपाः; S (except G3.4) °कृते. — ᵈ) T2 दुःशासनकृते स्वयं.

10 ᵃ) K1 B1.3.4.5 D (except D7.10) T1 G1 व्यसने; B3 °नात् (for °नैः). D3.4.9 च (for हि). — ᵇ) K1 D7.10 transp. यो and मित्रं. — ᶜ) K1.2 D1.7.8.10 अर्थज्ञो हि; K4 B4 D3.5 Cn अनयीय (Cnp अनुनीय as in text); B3 D3 अन्वयाय; D2 अर्थं ज्ञात्वा; D3.4.9 अनर्थज्ञः; T G1–3 अन्वानीय; G4.5 अन्वयानि. — ᵈ) B D2–4 S (except T1 M3) Cn तत् (for तं).

11 ᵇ) K2 S (except G3) संनिवर्तयेत्. — ᶜ) Hypermetric! K1 D7 Ca न वाच्यः (for अवाच्यः). K1 D1 T2 G3 कस्य; Ca.d कस्यचित् (as in text).

12 ᵃ) K1.2 D7 समीक्ष्य (for समर्थं).

13 ᵃ) K2 T1 G1 हितं च; B1.3.5 हिताय (for हितं हि). — ᵇ) S अथो (T2 G3 अथा-) हितं (for तथैव च). — ᵈ) D3 करि° (for यति°).

15 ᵃ) K2 D3 T1 G1 च; D2 तु (for हि). — ᵇ) D3.4.9 अभिमन्यते (for °पद्यते). — ᶜ) K4 Dn2 D1.5.9 माध्यस्थं; B1.3.5 D8 T2 G1.2 मध्यस्थ्यं; B3.4 D6 D3.4.6 माध्यस्थ्यं.

16 ᵃ) G3 M मा (for मां). N (except K1 D7; K3.5 missing) M5 अधर्मिष्ठा (D3 °ष्ठं) (for °र्मज्ञा). — ᵇ) K3.4 B Dn D8 D3–8.10 G3 सु(K3 कु)सुहृदः; D3–4.9 ह्यहृदयः (for असुहृदः). — ᶜ) D3.4.9 transp. शक्तो and न. D8 D6 न चार°; G4 नोवार° (for नावार°).

17 ᵇ) D1 T2 G3 M अयं (for अहं). G3.5 महाभाग इतीत्युत. — ᵈ) S धर्मस्यानृण्यतामियां.

18 =(var.) 5. 81. 4. — ᵃ) K1 D10 S धर्मार्थसंयुक्तं; D3.9 °र्थैर्युक्तं हि. — ᶜ) T2 G3 हि दास्यते; Ca आदा° (as in text).

19 ᵃ) K1 अवाप्यार्थं; K2 D8 अवाप्याहं; D2 (corrupt) प्रज्ञापयन् (m अहापयन्वै); D3.4 अहाप्य वै (for अहापयन्). Dn2 D8 पांडवार्थे. S अहं यतेयं पांडवानां हिता(G3.5 यथा-; G4 हामा)र्थं. — ᵇ) D1.2 अथ (for यदि). K1.2 Dn1 D1–4.5.10 चेच्चरेयं; B3 तैश्चरे°; D3 मा चरे° (for चाचरे°). S शर्म कुरूणां च सहेह (T1 G1 सह सर्वैः; T2 G3.4 च सहैव) राजभिः. — ᶜ) K4 B (except B3) Dn2 D8

९२

C. 5. 3330
B. 5. 94. 1
K. 5. 94. 1

वैशंपायन उवाच ।

तथा कथयतोरेव तयोर्बुद्धिमतोस्तदा ।
शिवा नक्षत्रसंपन्ना सा व्यतीयाय शर्वरी ॥ १
धर्मार्थकामयुक्ताश्च विचित्रार्थपदाक्षराः ।
शृण्वतो विविधा वाचो विदुरस्य महात्मनः ॥ २
कथाभिरनुरूपाभिः कृष्णस्यामिततेजसः ।
अकामस्येव कृष्णस्य सा व्यतीयाय शर्वरी ॥ ३
ततस्तु स्वरसंपन्ना बहवः सूतमागधाः ।
शङ्खदुन्दुभिनिर्घोषैः केशवं प्रत्यबोधयन् ॥ ४
तत उत्थाय दाशार्ह ऋषभः सर्वसात्वताम् ।
सर्वमावश्यकं चक्रे प्रातःकार्यं जनार्दनः ॥ ५
कृतोदकार्यजप्यः स हुताग्निः समलंकृतः ।
तत आदित्यमुद्यन्तमुपातिष्ठत माधवः ॥ ६
अथ दुर्योधनः कृष्णं शकुनिश्चापि सौबलः ।
संध्यां तिष्ठन्तमभ्येत्य दाशार्हमपराजितम् ॥ ७
आचक्षेतां तु कृष्णस्य धृतराष्ट्रं सभागतम् ।

महात्मन्; G4 महाफलं; Cn महार्थं (as in text). — d) D8 चेत्; D2.4.9 वै (for च). S शुच्येदंश्चेत् (G8 °रन्; G3 °रंसे) मृत्युपाशाद्धि सर्वे.

20 a) S का(G2.3 र)क्यां; Cn.d काक्ष्यां (as in text). — b) K1 आवेदयते; T2 G3 आचक्षेरन् (for अवेक्षे°). K1 धार्तराष्ट्रः. K2 D1 समर्थौ; K4 B (except B3) Dn D8 D5–10 शमार्थं; T1 G1 समग्रा; T2 G3 समार्थौ; G2 समर्था; G4.5 समग्राः (for समर्थौ). — d) T2 G3 प्रोक्तं (for प्राप्तं).

21 = 5. 70. 86.

22 D2.4.9 T1 G4 om. the ref. K3 resumes! — a) K1 D2.4.7.9.10 स (for इति). K2 एवमुक्त्वा तु वचनं. — b) D8 वृषभस्य; M3 अधिपस्य. D2.4.9 G2 तथा (for तदा). G4 वृष्णिवीरः प्रतापवान्. — d) N (mostly) शिष्ये. K3 भूयः (for यदु-).

Colophon missing in K3; K2 om. it. — *Sub-parvan:* K1.3.4 B Dn D8 D1.2.5–8.10 T1 G1 M भगवद्यान. — *Adhy. name:* T1 विदुरं प्रति भगवद्वचनं; M वासुदेव(M1 भगवन्)मतं. — *Adhy. no.* (figures, words or both): D8 89 (repeated); D5 85; D7 M1–2.4 94; T G1.4.5 95; G1 96; G2 M4 93. — *S'loka no.:* Dn1 D8 21; Dn2 22.

92

☞ This adhy. is missing in K3 (cf. v.l. 5. 32. 15).

1 a) D8 S कथाः (for तथा). K1.3.4 D (except Dn2 D8 D5.8.10) T2 G3.5 एवं. — b) D5 D2 G1.4 तथा (Dn2 ततः) (for तदा). — c) K1 नक्षत्रसहिता; Cn.d as in text. — d) = 3d. D7 व्यतीता च; D5 °ताथ (for °याय). T2 G3 सा व्यतीता विभावरी. — After 1, D8 G2 read 4.

2 K4 om. 2a–3b; M3 om. (hapl.) 2–3. — a) K1.2.6 B4.5 D7.10 धर्मकामार्थवत्य(B4.5 °युक्त)श्च; D1.2.4.9 धर्मार्थकामवत्यस्तु (D1 °श्च); D5 °वद्वाश्च; S (M3 om.) धर्म्याः रम्याश्चार्थवतीः. — b) D3 विचित्राः सुपदाक्षराः.

3 K4 om. 3ab; K2 M3 (cf. v.l. 2) om. 3. — a) D1.3 S (except M3; M3 om.) °कूलाभिः (for °रूपाभिः). — b) K1.3 हृतस्य; D5 तु तस्य; D8 एवं हि; T G1.2 रतस्य; G3 M (M3 om.) रतस्य (for कृष्णस्य). G4.5 अनुत्तमामितौजसः. — c) T G (except G4) एव (for इव). — d) = 1d. D5 व्यतीता च (for °याय).

4 D8 G2 read 4 after 1. — a) S (except T2 G3) ततः सुस्वरसंपन्ना. — d) D1.3 समबोधयन्; T2 G3 प्रत्यपूजयन्; M2.3 (inf. lin. as in text) °घोषयन् (for °बोधयन्). — After 4, K4 S (except G4) ins.:

419* ब्रह्मादिवसुदेवान्तं वंशं समनुकीर्तयन् ।
तुष्टुवुः केशवं तत्र बहवः सूतमागधाः ।
[(L. 2) K4 T1 पुंडरीकाक्षं (for केशवं तत्र).]

5 b) K2 D1 वृषभः. — c) G4 तदाह्निकं (for आवश्यकं). — d) G1.4 °कल्यं (for °कार्यं).

6 K2 om. 6–7. — a) K1 D5 M कृतोदकार्यजप्यः स (M1 सन्); K3 °काग्निजप्यः स; K4 B Dn D2.6.8 कृतोदका(B3 कृताग्निको)नुजप्यः स; D2.4.10 °कांतजप्यः स; D9 °दको यथान्यायं; T G कृतोदकः कृतजपः. — c) K4 M3 तत्र (for तत). T G transp. आदित्यं and उद्यन्तं. B (except B3) Dn1 D2.4 चादित्यम्. — d) D1.3 T2 G3.5 उपतिष्ठत. D1.2.7 G4 केशवः (for माधवः).

7 K3 om. 7 (cf. v.l. 6). — a) S ततो दुर्योधनः

कुरूंश्च भीष्मप्रमुखान्राज्ञः सर्वांश्च पार्थिवान् ॥ ८
त्वामर्थयन्ते गोविन्द दिवि शक्रमिवामराः ।
तावभ्यनन्दद्गोविन्दः साम्ना परमवल्गुना ॥ ९
ततो विमल आदित्ये ब्राह्मणेभ्यो जनार्दनः ।
ददौ हिरण्यं वासांसि गाश्चाश्वांश्च परंतपः ॥ १०
विसृष्टवन्तं रत्नानि दाशार्हमपराजितम् ।
तिष्ठन्तमुपसंगम्य ववन्दे सारथिस्तदा ॥ ११
तमुपस्थितमाज्ञाय रथं दिव्यं महामनाः ।
महाभ्रघननिर्घोषं सर्वरत्नविभूषितम् ॥ १२
अग्निं प्रदक्षिणं कृत्वा ब्राह्मणांश्च जनार्दनः ।
कौस्तुभं मणिमामुच्य श्रिया परमया ज्वलन् ॥ १३
कुरुभिः संवृतः कृष्णो वृष्णिभिश्चाभिरक्षितः ।
आतिष्ठत रथं शौरिः सर्वयादवनन्दनः ॥ १४
अन्वारुरोह दाशार्हं विदुरः सर्वधर्मवित् ।
सर्वप्राणभृतां श्रेष्ठं सर्वधर्मभृतां वरम् ॥ १५
ततो दुर्योधनः कृष्णं शकुनिश्चापि सौबलः ।
द्वितीयेन रथेनैनमन्वयातां परंतपम् ॥ १६
सात्यकिः कृतवर्मा च वृष्णीनां च महारथाः ।
पृष्ठतोऽनुययुः कृष्णं रथैरश्वैर्गजैरपि ॥ १७
तेषां हेमपरिष्कारा युक्ताः परमवाजिभिः ।
गच्छतां घोषिणश्चित्राश्चारु बभ्राजिरे रथाः ॥ १८
संमृष्टसंसिक्तरजः प्रतिपेदे महापथम् । G. 5. 3349 B. 5. 94. 20 K. 5. 94. 22

कर्णः. — c) K1 B1.2.3 Dn3 Ds2 D1.5-7 अभ्येतां; T1 G1.4 अभ्यायन्; T2 G2.3.5 M अभ्यायान्; Cs अभ्यैतां (for अभ्येत्य). — d) D7 अमितौजसं (for अपरा°).

8 a) K1 D1-4.8.9 च (for तु). K3 ततस्तस्य (for तु कृष्णस्य). S आचख्युस्तेथ (T2 °स्ते तु; G3.5 °स्ते च) कृष्णाय. Cs cites आचक्षेतां (as in text). — b) M3.4 सभां गतं. — d) S चैवाथ (for सर्वांश्च).

9 For S see below. — a) K1.2.3 D1 अर्चयं(K3 °य)तः; B3 Ds2 अर्थय(Ds2 °यं)तः; Cs as in text. K1 गोविंदं. — K5 om. 9^{b}–10^{b}. — For 9, S (transposing the lines) subst.:

420* तानभ्यनन्दद्गोविन्दः साम्ना परमवल्गुना ।
तेऽभ्यर्चयं देवकीपुत्रं दिवि शक्रमिवामराः ।

10 K5 om. 10^{ab} (cf. v.l. 9). — b) G3 महायशाः (for जना°). — c) Ds2 D1.2 G4 हिरण्यवासांसि. — d) K1 Ds2 D4 परंतप; D2 जनार्दनः. K3 गाश्च रत्नानि सर्वशः.

11 a) K4 B2.4 Dn D3 D4.6.8 विसृज्य बहुरत्नानि. Ca.d cite निसृष्टवन्तं. — d) T1 G1 ववंदे कृष्णसारथिः. — After 11, N (K3 missing; K5 om. line 2) ins.:

421* ततो रथेन शुभ्रेण महता किङ्किणीकिना ।
हयोत्तमयुजा शीघ्रमुपातिष्ठत दारुकः ।
[Line 1 = 5. 129. 21^{ab}.]

On the other hand a passage given in App. I (No. 5) is ins. in S after 11; in K4 after 421*.

12 K5 om. 12^{ab}. — b) D1 G4 महात्मनः (for °मनाः). — c) S °घनसंकाशं.

13 D7 om. 13^{c}–14^{d}. — c) D2.4.5 S आबध्य; Ca.d आमुच्य (as in text).

14 D7 om. 14 (cf. v.l. 13). — a) G3 चापि (for कृष्णो). — b) T2 G3 अपि संवृतः; G3 अपि रक्षितः (for अभि°). — c) K1.2 प्रातिष्ठत; G2-4 अतिष्ठत. — d) T2 °वल्लभः.

15 b) D2.4.9 चैव (for सर्व-). — K5 om. 15^{cd}; D9 om. 15^{c}–16^{b}. — c) T2 G1.2 श्रेष्ठः. — d) K2 सर्वप्राणभृतां; K4 B D (except D7.10; D9 om.) M2 सर्वबुद्धिमतां. B1.2 T G1.3.4 M1.3 चरः.

16 D9 om. 16^{ab} (cf. v.l. 15). — 16^{ab} = (var.) 7^{ab}. — a) B (except B4) तदा (for ततो). S कर्णः (for कृष्णं). — c) D2 D3 T2 G3 पृतम्; D2 पृत; D3 पृतम् (for एनम्). — d) D2.4.9 अन्वयाता; D3.8 अन्वायातां (D8 °तं); T1 G1 अन्वयुक्ते; T2 G2-5 M अनु(G3 °भि)याताः. K3 Dn1 Ds2 D7 परंतप; D2 परस्परं; D3.4.9 अरिंदमं.

17 b) K3.4 B D (except D7.10) अपरे रथाः (K3 Ds1 तथा) (for महा°). — d) K4.5 B D (except D1-4.7.9) transp. रथैः and गजैः. D1.2 तथा (for अपि).

18 K5 om. 18-26. — a) N (except D1; K3 missing; K5 om.) G3 Ca हेमपरिष्कारैः (K1.2 °ष्काराः; G3 °ष्कार-). — b) D6 (m as in text).8.9 G2 शुक्ताः (for युक्ताः). — c) K1.2 D1.7.10 प्रयांतः; Ds2 गच्छंतः; D2 व्रजंतः; D3.4.6 जयिनः; S चास्थतां (for गच्छतां). T2 G2-4 घोषणाश्च. B4 D5.6.8 चित्र- (for चित्राश्च). — d) K4 B Dn D3 D5.6.8 रथा राजन्विरेजिरे.

19 K5 om. 19 (cf. v.l. 18). — a) K1.2 D2.10 संमृष्टमथ संसिक्तं; Cap °संसिक्तरजं; Ca as in text. — b) Dn3 Ds2 D2.10 T G2.3 M4 महारथं; Ca as in text.

C. 5. 3349
B. 5. 94. 20
K. 5. 94. 22
राजर्षिचरितं काले कृष्णो धीमाञ्श्रिया ज्वलन् ॥ १९
ततः प्रयाते दाशार्हे प्रावाद्यन्तैकपुष्कराः ।
शङ्खाश्च दध्मिरे तत्र वाद्यान्यन्यानि यानि च ॥ २०
प्रवीराः सर्वलोकस्य युवानः सिंहविक्रमाः ।
परिवार्य रथं शौरेरगच्छन्त परंतपाः ॥ २१
ततोऽन्ये बहुसाहस्रा विचित्राद्भुतवाससः ।
असिप्रासायुधधराः कृष्णस्यासन्पुरःसराः ॥ २२
गजाः पराःशतास्तत्र वराश्चाश्वाः सहस्रशः ।
प्रयान्तमन्वयुर्वीरं दाशार्हमपराजितम् ॥ २३
पुरं कुरूणां संवृत्तं द्रष्टुकामं जनार्दनम् ।
सवृद्धबालं सस्त्रीकं रथ्यागतमरिंदमम् ॥ २४
वेदिकापाश्रिताभिश्च समाक्रान्तान्यनेकशः ।
प्रचलन्तीव भारेण योषिद्भिर्भवनान्युत ॥ २५
संपूज्यमानः कुरुभिः संशृण्वन्विविधाः कथाः ।
यथार्हं प्रतिसत्कुर्वन्प्रेक्षमाणः शनैर्ययौ ॥ २६
ततः सभां समासाद्य केशवस्यानुयायिनः ।
सशङ्खैर्वेणुनिर्घोषैर्दिशः सर्वा व्यनादयन् ॥ २७
ततः सा समितिः सर्वा राज्ञाममिततेजसाम् ।
संप्राकम्पत हर्षेण कृष्णागमनकाङ्क्षया ॥ २८
ततोऽभ्याशगते कृष्णे समहृष्यन्नराधिपाः ।
श्रुत्वा तं रथनिर्घोषं पर्जन्यनिनदोपमम् ॥ २९
आसाद्य तु सभाद्वारमृषभः सर्वसात्वताम् ।

— After 19^{ab}, T1 G4 read 24^{cd}. — c) Dn1 D1.8 G4 राजर्षिचरिते (D8 G4 °तः) काले. — d) S श्रिया परमया ज्वलन्.

20 K3 om. 20 (cf. v.l. 18). — b) K1 प्राघोषंत; K2 D1.2.5 T2 G3-5 M2 प्रवाद्यंत (G3.5 °ते). T G1.2.4.5 अथ पुष्कराः; G3 M च पुष्कराः; Ca एकपुष्कलाः; Cd.s as in text. — c) D3-5.8.9 शंखांश्च. — d) T2 (m as in text) वाद्यभांडानि यानि च.

21 K3 om. 21 (cf. v.l. 18). — b) D3 सत्व° (for सिंह°). — d) D7 अतिष्ठंत (for अगच्छन्त). K1.2 परं शताः; D3.4.6 G2 °तप; G4 °तपं.

22 K3 om. 22 (cf. v.l. 18). — ab) K ततो योधवरा हृष्टा विविधायुधपाणयः. — c) K2 असिचक्रायुधधराः. — After 22, K3 ins.:

422* योधाः परशुहस्ताश्च शतशोऽथ सहस्रशः ।

After the above, K3 reads 26^{ab}, 25, 23^{cd}, 24, 23^{ab}, 26^{cd}, etc.

23 K3 om. 23 (cf. v.l. 18). For sequence of K3 cf. v.l. 22. — a) K2 D1.7 G2.4 परशताः; K4 B1-3.5 Dn1 D2.6.8 पंचशताः; B4 Dn2 D5 D3.4.9.10 पंचाशताः; M Cd परं शताः (for पराःशताः). T2 G3 चात्र (for तत्र). — b) K1 T G (except G4) व(T1 G6 प)राश्वाश्च; K4 B D रथाश्चासन् (D3 °श्चाश्वाः; D10 °श्चैव); M3 पराश्चाश्वाः (for वराश्चाश्वाः). D1.2 च सर्वशः; G4 (inf. lin. as in text) पराःशताः (for सहस्रशः). — c) K2 हृष्टास्तम्; B (except B1) Dn2 Dn3 D2.4.9 प्रायांतम्; D6 प्रयातम्. K1.2 D1.9.10 T1 G1 M वीराः.

24 K3 om. 24 (cf. v.l. 18). For sequence of K3 cf. v.l. 22. — a) D8 पूर्वं (for पुरं). G2.5 संप्रहृष्टं; M प्रवृत्तं; Ca संस्मृतं (for संवृत्तं). — b) G2.5 यथा° (for द्रष्टु°). — T1 G4 read 24^{cd} after 19^{ab}. — c) K4 Dn D8 D2.6.8 स(D8 बा)बालवृद्धं (for सवृद्धबालं). K2 D7 सवृद्धबालसस्त्रीकं. — d) K2.4 Dn1 D7.10 G2.5 M1.2 अरिंदम.

25 K3 om. 25 (cf. v.l. 18). For sequence of K3 cf. v.l. 22. — a) K4 B D (except D1) G2 M1 वेदिकामा(G2 °मारुा)श्रिताभिश्च; G4 °पाश्रयाभिश्च. — 25^{cd} =(var.) 5. 87. 9^{cd}.

26 K3 om. 26 (cf. v.l. 18). For sequence of K3 cf. v.l. 22. — a) B (except B3) Dn1 D2.8 स पूज्यमानः. G2 संपूज्यः कुरुभिः सर्वैः; G3 माधवः कुरुभिः पूज्यः. — b) K1 D2.3 G3 M2 स शृण्वन्; K2 शृण्वंश्च. N (except K2 D1.3; K3 missing; K5 om.) मधुराः (for विविधाः). K2 गिरः (for कथाः). — c) K2 यथावत् (for यथार्हं). D7 प्रतिकुर्वन्वै. — d) D3 T M2 प्रेक्ष्यमाणः. K3 यथा; D7 अपि (for ययौ).

27 c) S °संमिश्रैः (for °निर्घोषैः). — d) B4 D3-4.9 G4 सर्वांश्च(D3 °श्चु)नादयन्; G2 सर्वा ह्यना°.

28 K3 om. 28^{c}-29^{d}. — c) M (except M1) प्राकंपत प्रहर्षेण.

29 K3 om. 29 (cf. v.l. 28). — a) K2.3.4 B (except B3) D6-8.10 अभ्याशगते. — b) D2 T2 (m as in text) G3 समाहृष्टा (for समहृष्यन्). — c) K1 D7.10 अथ (for तं).

30 a) K2.4 ततः प्राप्य (for आसाद्य तु). M2-5 सभामूर्द्धाम् (for °द्वारम्). — c) K1.3 D7 सोवतीर्य.

अवतीर्य रथाच्छौरिः कैलासशिखरोपमात् ॥ ३०
नगमेघप्रतीकाशां ज्वलन्तीमिव तेजसा ।
महेन्द्रसदनप्रख्यां प्रविवेश सभां ततः ॥ ३१
पाणौ गृहीत्वा विदुरं सात्यकिं च महायशाः ।
ज्योतींष्यादित्यवद्राजन्कुरून्प्रच्छादयञ्श्रिया ॥ ३२
अग्रतो वासुदेवस्य कर्णदुर्योधनावुभौ ।
वृष्णयः कृतवर्मा च आसन्कृष्णस्य पृष्ठतः ॥ ३३
धृतराष्ट्रं पुरस्कृत्य भीष्मद्रोणादयस्ततः ।
आसनेभ्योऽचलन्सर्वे पूजयन्तो जनार्दनम् ॥ ३४
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्महामनाः ।
सहैव भीष्मद्रोणाभ्यामुदतिष्ठन्महायशाः ॥ ३५
उत्तिष्ठति महाराजे धृतराष्ट्रे जनेश्वरे ।
तानि राजसहस्राणि समुत्तस्थुः समन्ततः ॥ ३६
आसनं सर्वतोभद्रं जाम्बूनदपरिष्कृतम् ।
कृष्णार्थे कल्पितं तत्र धृतराष्ट्रस्य शासनात् ॥ ३७
स्मयमानस्तु राजानं भीष्मद्रोणौ च माधवः ।
अभ्यभाषत धर्मात्मा राज्ञश्चान्यान्यथावयः ॥ ३८
तत्र केशवमानर्चुः सम्यगभ्यागतं सभाम् ।
राजानः पार्थिवाः सर्वे कुरवश्च जनार्दनम् ॥ ३९
तत्र तिष्ठन्स दाशार्हो राजमध्ये परंतपः ।
अपश्यदन्तरिक्षस्थानृषीन्परपुरंजयः ॥ ४०
ततस्तानभिसंप्रेक्ष्य नारदप्रमुखानृषीन् ।
अभ्यभाषत दाशार्हो भीष्मं शांतनवं शनैः ॥ ४१
पार्थिवीं समितिं द्रष्टुमृषयोऽभ्यागता नृप ।　C. 5. 3372 B. 5. 94. 47 K. 5. 94. 54

— [d]) A few N MSS. कैलाश°.

31 K_3 om. 31–32. — [a]) K_4 B_{2-4} Dn D_{3a} $D_{1.5.7.8}$ नव°. — K_1 om. 31^{bc}. — [d]) K_2 transp. सभां and ततः.

32 K_3 om. 32 (cf. v.l. 31). — [a]) $D_{2-4.9}$ पार्श्वे (for पाणौ). — [d]) K_4 B D (except $D_{1.7}$) M_{3-5} प्र(Dn1 आ)च्छा°.

33 $D_{3.4.8}$ om. 33^{d}–34^{c}. — [cd]) K (K_3 missing) B Dn Ds $D_{1.5-8.10}$ अभ्यासन् (K_3 आसीत्); D_3 ह्यासन् (for आसन्).

34 $D_{3.4.8}$ om. 34^{abc} (cf. v.l. 33). — [b]) Ds $D_{7.8.10}$ तथा; D_1 तु ते; D_2 S च ते (for ततः). T_2 G_3 भीष्मद्रोणकृपास्ततः. — 34^{cd} = 5. 87. 14^{cd} (cf. v.l. 35).

35 = (var.) 5. 87. 13. — K_3 om. 35. — [b]) K_4 B_4 Dn Ds $D_{5.6.8}$ नरेश्वरः; $B_{1-3.5}$ नराधिपः (for महामनाः). — [c]) K_4 B D (except $D_{2-4.8.9}$) G_1 द्रोणभीष्माभ्यां (by transp.). — [d]) $G_{1.2.4}$ °मनाः (for °यशाः).

36 [a]) $M_{3.4}$ महाराज. — [b]) D_1 नरेश्वरे; D_2 महात्मनि (for जने°). — [c]) D_7 सर्वे एव समुत्तस्थुः. — [d]) K_2 D_7 सहस्रशः (for समन्ततः). D_2 राजानो ये समागताः.

37 [a]) M_2 °सूत्रं (for °भद्रं). — [b]) G_3 सर्वरत्नविभूषितं. — K_3 (which om. 38^{a}–40^{b}) ins. after 37:

428*　　दुर्योधन उवाच ।
भीष्मद्रोणौ परित्यज्य त्वया मां मधुसूदन ।
किमर्थं पुण्डरीकाक्ष कृतं वृषलभोजनम् ।
　　भगवानुवाच ।
भक्तं पृच्छसि राजेन्द्र आदरं किं न पृच्छसि ।
भोजनं गतशीर्णं तु आदरमजरामरम् ।
आदरेणोपनीतानि शाकान्यपि फलानि च ।
प्रीणन्ति मम गात्राणि नामृतं मानवर्जितम् ।
वरं शाकाङ्कुलं प्रीतं सद्यः प्राणहरं च यत् ।
न तु भुक्तं धनाढ्यस्य भुवा कुटिलितेक्षुपे (sic) ।
न जातिः कारणं तात गुणाः कल्याणकारणम् ।
चाण्डालमपि सद्वृत्तं तं देवा ब्राह्मणं विदुः ।
कैवर्तीगर्भसंभूतो व्यासो नाम महामुनिः ।
तपसा ब्राह्मणो जातस्तस्माज्जातिर्न कारणम् ।

38 K_3 om. 38^{a}–40^{b}. — [a]) $D_{2-4.9}$ S च (for तु). — [b]) T_2 G_3 भीष्मद्रोणैश्च. — [c]) K_2 दाशार्हः (for धर्मात्मा). — [d]) T_1 G_1 यथार्हतः; T_2 G_4 M यथागतान्; $G_{2.3.5}$ अथागतान्; M_1 (*inf. lin.*) समागतान् (for यथावयः).

39 K_3 om. 39 (cf. v.l. 38). — [a]) K_2 ते तु; D (except Dn $D_{1.2.5.6}$) G_4 ततः (for तत्र). — [b]) K_1 शुभं (for सभाम्). K_2 सभामध्यगतं विभुं. — [c]) K_4 $D_{5.8}$ प्रहृष्टाः; $M_{3.5}$ राजानं. K_2 संगताः (for पार्थिवाः).

40 K_3 om. 40^{ab} (cf. v.l. 38). — [a]) T_2 G_1 ततस् (for तत्र). B_3 Ds $D_{3-8.10}$ अतिष्ठत; S तिष्ठंस्तु (for तिष्ठन्स). — [b]) Dn_1 Ds_2 $D_{3.4}$ परंतप.

42 [a]) K_1 Dn_1 Ds_2 $D_{1.5.6.8.9}$ $G_{2.3}$ निमंन्त्रताम्; K_2 Ds T_2 $G_{1.4}$ निमंन्त्र तान्; G_3 आमन्त्र्यताम्. — [d]) K_3 संस्कारैणैव (for सत्कारेण च).

C. 5. 3372
B. 5. 94. 43
K. 5. 94. 55
निमन्त्रयन्तामासनैश्च सत्कारेण च भूयसा ॥ ४२
नैतेष्वनुपविष्टेषु शक्यं केनचिदासितुम् ।
पूजा प्रयुज्यतामाशु मुनीनां भावितात्मनाम् ॥ ४३
ऋषीञ्शांतनवो दृष्ट्वा समाद्वारमुपस्थितान् ।
त्वरमाणस्ततो भृत्यानासनानीत्यचोदयत् ॥ ४४
आसनान्यथ मृष्टानि महान्ति विपुलानि च ।
मणिकाञ्चनचित्राणि समाजह्रुस्ततस्ततः ॥ ४५
तेषु तत्रोपविष्टेषु गृहीतार्घ्येषु भारत ।
निषसादासने कृष्णो राजानश्च यथासनम् ॥ ४६
दुःशासनः सात्यकये ददावासनमुत्तमम् ।
विविंशतिर्ददौ पीठं काञ्चनं कृतवर्मणे ॥ ४७
अविदूरेऽथ कृष्णस्य कर्णदुर्योधनावुभौ ।
एकासने महात्मानौ निषीदतुरमर्षणौ ॥ ४८
गान्धारराजः शकुनिर्गान्धारैरभिरक्षितः ।
निषसादासने राजा सहपुत्रो विशां पते ॥ ४९
विदुरो मणिपीठे तु शुक्लस्पर्ध्याजिनोत्तरे ।
संस्पृशन्नासनं शौरेर्महामतिरुपाविशत् ॥ ५०
चिरस्य दृष्ट्वा दाशार्हं राजानः सर्वपार्थिवाः ।
अमृतस्येव नातृप्यन्प्रेक्षमाणा जनार्दनम् ॥ ५१
अतसीपुष्पसंकाशः पीतवासा जनार्दनः ।
व्यभ्राजत सभामध्ये हेम्नीवोपहितो मणिः ॥ ५२
ततस्तूष्णीं सर्वमासीद्गोविन्दगतमानसम् ।
न तत्र कश्चित्किंचिद्धि व्याजहार पुमान्क्वचित् ॥ ५३

इति श्रीमहाभारते उद्योगपर्वणि द्विनवतितमोऽध्यायः ॥ ९२ ॥

---

44 a) B (except B4) D1–4.6 T G1.3.5 उपागतान् (for उपस्थितान्). — K3 om. 44c–53d. — c) D2–4.6 भीष्मः (for भृत्यान्). — d) D2–4.6 भृत्यानर्थं; T1 G1 आसनार्थं (for आसनानीति).

45 K3 om. 45 (cf. v.l. 44). — b) विमलानि (T2 G3 विविधानि) (for विपुलानि). — c) D4.6 °कांचनरत्नानि. — d) K3 जना बहुस् (for समा°).

46 K3 om. 46 (cf. v.l. 44). — b) K1.2.4 Dn1 D4.6–8 गृहीतार्घेषु; B (except B4) Dn2 D1.2 S गृहीतार्घ्येषु.

47 K3 om. 47 (cf. v.l. 44). — a) K1 D8 सात्यकाय; G3 सात्यकिने. — Dn1 om. 47c–48b.

48 K3 D8 om. 48 (cf. v.l. 44); Dn1 om. 48ab (cf. v.l. 47). — a) K4 B D (except Dn2; Dn1 D8 om.) तु (for ऽथ). T1 G1 अविदूरेण; T2 G2 अतिदूरेण (for °दूरेऽथ). — d) K1 D7 T1 Cnp निषेदतुः; D1.2.4.6 न्य(D1 नि)षीदेतां; Cn निषीदतुः (as in text). D7 S अरिंदमौ (for अमर्षणौ).

49 K3 om. 49 (cf. v.l. 44). — a) D4.6 विवेश शकुनिस्तत्र; D8 विवेश तत्र शकुनिः. — b) K3 अभिपूजितः; G3 सर्वतो वृतः; M अभिसंवृतः (for °रक्षितः). — c) K1 D1.2.4.6 शुभे; K3 राजन् (for राजा). — d) K2 D1–4.7.8 T G (except G3) M1 सह पुत्रैर्; M2–5 सह ताभ्यां (for °पुत्रो).

50 K3 om. 50 (cf. v.l. 44). — b) K3.4 Dn2 D2.6.8 T2 G1 शुक्लस्पर्ध्ये(T2 G1 °स्पर्ध)जिनोत्तरे.

51 K3 om. 51 (cf. v.l. 44). — ab) K3 transp. दाशार्हं and राजानः. K4 B D (except D1.3.10) सर्वे एव ते (for °पार्थिवाः).

52 K3 om. 52 (cf. v.l. 44). — c) D2.4.6 सदो° (for सभा°). — d) T G हेम्नी(T2 G3 °म्ने; G8 °म्ना)वोपचितो मणिः.

53 K3 om. 53 (cf. v.l. 44). — a) M2 तत्र (for ततस्). D2.4.6 समासीरन् (for सर्वमासीद्). — b) D2.4.6 °गतचेतसः; S °गतचेतनं (G2 °सं). — c) D6 D8 T2 G3 transp. कश्चित् and किंचित्. K4 B D (except D1.3.10) वा; G3.4 च (for हि). — d) D7.10 (sup. lin. as in text) तदा; S मुदा (for पुमान्).

Colophon missing in K3. — *Sub-parvan:* K1.2.6 B Dn D8 D2.6–8.10 T1 G1 M भगवद्यान. — *Adhy. name:* D1 कृष्णस्य पुनः सभागमनं; T1 भगवतः सभाप्रवेशः; G1 M सभाप्रवेशः; G6 कृष्णसभाप्रवेशः. — *Adhy. no.* (figures, words or both): D2 90; D8 85 (repeated); D7 M1–3.5 95; T G2.4.5 96; G1 97; G3 M4 94. — *S'loka no.:* Dn1 D8 53; Dn2 54.

९३

वैशंपायन उवाच ।
तेष्वासीनेषु सर्वेषु तूष्णींभूतेषु राजसु ।
वाक्यमभ्याददे कृष्णः सुदंष्ट्रो दुन्दुभिस्वनः ॥ १
जीमूत इव घर्मान्ते सर्वां संश्रावयन्सभाम् ।
धृतराष्ट्रमभिप्रेक्ष्य समभाषत माधवः ॥ २
कुरूणां पाण्डवानां च शमः स्यादिति भारत ।
अप्रयत्नेन वीराणामेतद्यतितुमागतः ॥ ३
राजन्नान्यत्प्रवक्तव्यं तव निःश्रेयसं वचः ।
विदितं ह्येव ते सर्वं वेदितव्यमरिंदम ॥ ४
इदमद्य कुलं श्रेष्ठं सर्वराजसु पार्थिव ।
श्रुतवृत्तोपसंपन्नं सर्वैः समुदितं गुणैः ॥ ५
कृपानुकम्पा कारुण्यमानृशंस्यं च भारत ।
तथार्जवं क्षमा सत्यं कुरुष्वेतद्विशिष्यते ॥ ६
तस्मिन्नेवंविधे राजन्कुले महति तिष्ठति ।
त्वन्निमित्तं विशेषेण नेह युक्तमसांप्रतम् ॥ ७
त्वं हि वारयिता श्रेष्ठः कुरूणां कुरुसत्तम ।
मिथ्या प्रचरतां तात बाह्येष्वाभ्यन्तरेषु च ॥ ८
ते पुत्रास्तव कौरव्य दुर्योधनपुरोगमाः ।
धर्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत् ॥ ९
अशिष्टा गतमर्यादा लोभेन हृतचेतसः ।
स्वेषु बन्धुषु मुख्येषु तद्वेत्थ भरतर्षभ ॥ १०
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।
उपेक्ष्यमाणा कौरव्य पृथिवीं घातयिष्यति ॥ ११
शक्या चेयं शमयितुं त्वं चेदिच्छसि भारत । C. 5. 3306 B. 5. 93. 12 K. 5. 93. 14

93

☞ This adhy. is missing in K_3 (cf. v.l. 5. 32. 15).

1 ^{a}) $K_{3.5}$ T_1 $G_{4.5}$ आसनेषु (for आसी°). — ^{d}) T_2 G_3 देवदुंदुभिनिस्वनः; $G_{3.5}$ सुदंष्ट्रो भीमनिस्वनः.

2 ^{b}) D_3 सर्वं; D_6 G_6 M_3 सर्वान् (for सर्वां). K_2 $D_{1.2}$ S (except G_4) विश्रा(D_1 °द्रा)वयन् (for संश्रा°). — ^{d}) $K_{1.3}$ समाभाष्य च; T_1 समाभाषत (for समभा°). D_7 समाभाष्य जनार्दनः.

3 Before 3, $K_{1.4}$ D_{n1} $D_{7.10}$ श्रीभगवानुवाच; $D_{2.4.8.9}$ भगवानुवाच ($D_{2.4}$ om. उ°); T_1 $G_{1.5}$ श्रीकृष्णः; T_2 श्रीगोविंदः. — ^{c}) K_2 सुप्रयत्नेन; K_4 B D (except $D_{1.3.8}$) श्रमणाद्येन (for अप्रयत्नेन). — ^{d}) $K_{1.2}$ $D_{2-4.8}$ T_2 $G_{2.3}$ वेदितुम्; B_4 D_8 याचितुम्; T_1 G_1 गदितुम्; G_2 विदितुम् (for यतितुम्).

4 Before 4, M_{2-3} ins. वासुदेवः. — ^{a}) S अत्र (for नान्यत्). $D_{2-6.8.9}$ राजन्नथैव वक्तव्यं. — ^{b}) K_4 B (except B_2) D (except $D_{1-4.8.10}$) नैःश्रे° (for निःश्रे°). — ^{c}) B_2 $D_{1.7}$ तत् (for ते).

5 ^{a}) N (except D_1; K_3 missing) ह्यत्र (for अद्य). — ^{b}) $K_{1.2.5}$ B_2 $D_{7.10}$ भारत (for पार्थिव). S पृथिव्यां सर्वराजसु. — K_2 (which om. hapl. 5^c–6^d) ins. after 5^{ab}:

424* त्वन्निमित्तं विशेषेण नेह युक्तं विशिष्यते ।

6 K_2 om. 6 (cf. v.l. 5). — ^{a}) K_3 दानं (for सत्यं). S सत्यं क्षमा(G_4 तितिक्षा च)र्जवं चैव. — ^{b}) D_5 T $G_{1.2.4}$ एव; D_2 एवं (for एतद्). $D_{2.4.9}$ विभाव्यते; S विशेषतः (for विशि°).

8 ^{a}) K_2 D_1 $C_{a,d}$ वारयतां; K_4 $B_{3.4}$ D_n D_{10} धारयिता; G_1 M_4 पारयिता. K_3 त्वं निवारयतां श्रेष्ठः. — ^{c}) $D_{2.4}$ प्रचलतां. — ^{d}) B_3 $D_{5.6}$ S (except $G_{1.3}$ M_1) अभ्यंतरेषु.

9 ^{a}) $B_{1.3}$ स्वत्°; $B_{2.3}$ D_3 $D_{5.6.8}$ तत् (for ते). T_1 G_1 तव पुत्रास्तु कौरव्य. — ^{d}) K_1 D_{10} प्रचलंति.

10 ^{a}) T $G_{1.2.4}$ हृत° (for गत°). — ^{b}) K_2 गतचेतसः; D_5 हृत°; T_1 G_1 आहृत°. K_1 B_2 लोभोपहृ(B_2 °हृ)तचेतसः. — ^{d}) T_1 G_2 विद्धि (for वेत्थ). B D (except $D_{2.4.7.9}$) पुरुष° (for भरत°). G_4 त्वमेतद्वेत्थ भारत.

11 K_2 om. 11–14. — ^{a}) M (except M_1) सोयं (for सेयं). — ^{b}) $K_{1.2}$ $D_{1.2.10}$ भरतान् (K_2 भवतां; D_2 भारतान्) प्रत्युपस्थिता; $D_{2.4.9}$ T_2 $G_{2.4}$ कुरुष्वेवमुप(G_4 °व व्यव)स्थिता; D_7 भारतानामुपस्थिता. — ^{c}) Some MSS. उपेक्ष°. T_2 $G_{1.3}$ उपेक्ष्यमाणः. — ^{d}) T $G_{1.3}$ घातयिष्यसि.

12 K_2 om. 12 (cf. v.l. 11). — ^{b}) B_4 D_3 C_n न (C_{np} त्वं as in text). B_4 D_3 C_n दिच्छसि (C_{np} इच्छसि as in text). — ^{c}) $K_{1.2}$ T_2 G_{2-4} M सुदुष्करो (for न दुष्करो). $K_{1.2}$ T_2 $G_{2.4}$ M अपि (for हि). G_5 दुष्करो-

C. 5. 3305
B. 5. 93. 12
K. 5. 95. 12
न दुष्करो ह्यत्र शमो मतो मे भरतर्षभ ॥ १२
त्वय्यधीनः शमो राजन्मयि चैव विशां पते ।
पुत्रान्स्थापय कौरव्य स्थापयिष्याम्यहं परान् ॥ १३
आज्ञा तव हि राजेन्द्र कार्या पुत्रैः सहान्वयैः ।
हितं बलवदप्येषां तिष्ठतां तव शासने ॥ १४
तव चैव हितं राजन्पाण्डवानामथो हितम् ।
शमे प्रयतमानस्य मम शासनकाङ्क्षिणाम् ॥ १५
स्वयं निष्कलमालक्ष्य संविधत्स्व विशां पते ।
सहभूतास्तु भरतास्तवैव स्युर्जनेश्वर ॥ १६
धर्मार्थयोस्तिष्ठ राजन्पाण्डवैरभिरक्षितः ।
न हि शक्यास्तथाभूता यत्नादपि नराधिप ॥ १७

न हि त्वां पाण्डवैर्जेतुं रक्ष्यमाणं महात्मभिः ।
इन्द्रोऽपि देवैः सहितः प्रसहेत कुतो नृपाः ॥ १८
यत्र भीष्मश्च द्रोणश्च कृपः कर्णो विविंशतिः ।
अश्वत्थामा विकर्णश्च सोमदत्तोऽथ बाह्लिकः ॥ १९
सैन्धवश्च कलिङ्गश्च काम्बोजश्च सुदक्षिणः ।
युधिष्ठिरो भीमसेनः सव्यसाची यमौ तथा ॥ २०
सात्यकिश्च महातेजा युयुत्सुश्च महारथः ।
को नु तान्विपरीतात्मा युध्येत भरतर्षभ ॥ २१
लोकस्येश्वरतां भूयः शत्रुभिश्चाप्रधृष्यताम् ।
प्राप्स्यसि त्वममित्रघ्न सहितः कुरुपाण्डवैः ॥ २२
तस्य ते पृथिवीपालास्त्वत्समाः पृथिवीपते ।

ण्यत्र न शमो.

13 K_3 om. 13 (cf. v.l. 11). — ^{a}) K_4 $D_{5.6.8}$ त्वयि (for मयि). — After 13^{ab}, D_7 ins.:

425* सहभूतास्त्वयैवेते सर्वनाशाय भारत ।

— ^{c}) B_4 राजेंद्र (for कौरव्य). — ^{d}) K_3 चापरान् (for अहं परान्). — After 13, S (except $G_{3.4}$) ins.:

426* हितं हि धार्तराष्ट्राणां पाण्डवानां तथा हितम् ।
शमे प्रयतमानानां तव शासनकाङ्क्षिणाम् ।
[With line 2, cf. 5. 90. 10^{cd}.]

14 K_3 om. 14 (cf. v.l. 11). — $D_{3-5.8}$ *repeat* 14^{ab} after 21. — ^{a}) S अनुज्ञातं (for आज्ञा तव). $D_{5.7.8}$ transp. तव and हि. T_2 G_2 भगवता (for हि राजेन्द्र). D_1 कौरव्य; T_1 $G_{1.2-3}$ M_1 (*inf. lin.*) भवता; M भवतः (for राजेन्द्र). — ^{b}) S सर्वैः (for कार्या). $B_{1.3.4}$ D_7 सहानुगैः (D_7 °जैः); $D_{5.6.8}$ सबांधवैः. — ^{c}) $D_{5.6.8}$ बलं यद् (for बलवद्).

15 G_4 om. 15^{a}–17^{b}. — ^{a}) D_1 तथैव च (for तव चैव). $D_{5.6.8}$ हि राजेंद्र (for हितं राजन्). — ^{b}) K_3 तथा; T_2 ततो (for अथो). — M_2 om. 15^{cd}. — 15^{cd} = (var.) 5. 90. 10^{cd}. — ^{d}) K (K_3 om.) D (except $D_{5.6}$) M_2 तव (for मम). N T_1 G_2 °काङ्क्षिणः.

16 G_4 om. 16. — ^{a}) D_{10} शमं; C_s स्वयं (as in text). K (K_3 missing) B $D_{2.5-8.10}$ Cap निष्फलं (D_2 *sup. lin. sec. m.* निश्चयं); D_1 लक्षणं; $C_{a.d.s}$ निष्कलं (as in text). $D_{5.6.8}$ स्वयं निष्कलुषं कार्यं; S (G_4 om.) तेषां (T_2 G °षु) निष्कल्मषं राजन्. — ^{b}) K_1 $D_{5.6.8}$ त्वं विधत्स्व; C_s संवि° (as in text). — ^{c}) K_4 B D (except $D_{1.7}$) सहायभूताः; T_2 G_3 समाहूतास्तु; $C_{a.d.s}$ सहभूतास्तु (as in text). D_{n3} D_8 T_2 $G_{3.5}$ भवता (for भरताः). — D_8 om. (? hapl.) 16^{d}–17^{a}. — ^{d}) $K_{1.3}$ D_1 तथा; S सह (for तव). K_3 D_{10} जनेश्वराः; T_1 $G_{3.5}$ M जनाधिप; T_2 G_3 जनाधिपाः; G_1 नराधिप.

17 D_8 om. 17^{abc} (cf. v.l. 16); G_4 om. 17^{ab}. — ^{c}) S °रूपा (for °भूता). $D_{5.6.8}$ न हि शक्यस्तदा भूयः. — ^{d}) K_3 यत्नेनापि नराधिप; S युद्धे जेतुं जना(T_2 $G_{1.3}$ नरा)धिप.

